# द्वितीयोऽध्यायः

1. उपवेदानां महत्त्वम्

2. धनुर्वेदसंहितायाः परिचयः

3. धनुर्वेदस्य विषयवैशिष्ट्यम्

# 1. उपवेदानां महत्त्वम्

संस्कृतवा›मये सर्वाधारग्रन्थाः वेदा एव सन्ति। वेदानां उपवेदानां महत्वं वर्तते। संस्कृतवा›मयस्याधारः यथा चत्वारो वेदाः तथैव चर्तुणांवेदानां चत्वारः उपवेदाः सन्ति। ते मूलवेदान्निःसृतास्सन्ति।

उपमितो वेदेन प्रधानवेद अतिरिक्तः वेदः उपवेदः भवति। वेदसदृश उपवेदाः भवन्ति। दैत्यगुरु शुक्रेण एवं उपवेदानां गणनाकृता। यथा –

ऋग्यजुः साम चाथर्वा वेदा आयुधनुः क्रमात्।
गान्धर्वश्चैव तन्त्राणि उपवेदा प्रकीर्तिकाः ।।[1]

यथा महाभारतेऽपि उपवेदानामुल्लेखो वर्तते। यथा –

उपवेदान् खलीनांश्च कृत्वा लोकत्रयेश्वरः।

यथा एकसिमन् पद्ये –

आयुर्वेदो धनुर्वदो गान्धर्वश्चेति त्रयः।
स्थापत्यवेदमपरपुवेदश्चतुरविधः।।

यथा भगवानवेदव्यासेन कथितम् यत् –

तत्र वेदानामुवेदाश्चत्वारो भवन्ति। ऋग्वेदस्यायुर्वेदः उपवेदो यजुर्वेदस्य धनुर्वेदः उपवेदः सामवेदस्य गान्धर्ववेदः अथर्ववेदस्यार्थशास्त्रं चेत्याहु। तत्रैव महाभारते प्रत्येकोपवेदेस्यद्रष्टा ऋषिर्नामपि दीयते। यथा –

गान्धर्व नारदो वेद भरद्वाजो धनुर्ग्रहम्।
देवर्षिचरितं गार्ग्यः, कृष्णात्रेयश्चिकित्सितम्।।[2]

अयं उपवेदः चतुर्विधः सन्ति। तद्यथा –

1. आयुर्वेदः।
2. धनुर्वेदः।
3. गान्धर्ववेदः।
4. स्थापत्यवेदश्च।

यत्र कुत्रापि आयुर्वेदः अपि उपवेदरूपेण अथर्ववेदस्य स्वीक्रियन्ते, अपरञ्च कतिपयजनानां मते आयुर्वेस्योपवेदः अर्थर्वेदः इति मन्यते च।

दैत्यगुरुणा शुक्रेण तन्त्रमुपवेदं अथर्ववेदस्यस्ति इति प्रतिपादितः। अतः वेदसदृशमेव उपवेदाः भवन्ति च। अत्रोपवेदानां परिचयः प्रदर्श्यते।

**आयुर्वेदस्य परिचयः –**

तस्यायुषः पुण्यततमो वेदो वेदविदां मतः।

वक्ष्यते यन्मनुष्याणां लोकयोरूभयोहितम्।।[3]

जीवनेन् सह ज्ञानविज्ञानस्य परम्परापि निरन्तरं वहति। आर्यावर्ते ज्ञान–विज्ञानस्य शाखा–प्रशाखाः आदिकालात् विद्यमानास्ति। अत्र ज्ञानस्य सर्वधाराः वेदेषु आविर्भूता। अस्या धारायाः वेदैव ज्ञानग›ोत्री अस्ति। अस्य वेदचतुष्टयस्य चत्वारोवेदाः अपि सन्ति। यथा क्रमेण ऋग्वेदस्य स्थापत्यर्वेदः यजुर्वेदस्य–धनुर्वेदाः सामवेदस्य–गान्धर्ववेदः तथा च अथर्ववेदस्य आयुर्वेदस्य अस्ति इति।

येनानुसारेण आयुर्वेदस्य किं वा चिकित्साशास्त्रस्य विशिष्टसम्बन्धो अथर्ववेदेन् सह अस्ति। सम्भवतः अस्य कारणं यत् अस्मिन् अथर्ववेदे अन्यवेदानामुपेक्षया रोगाणां चिकित्सा च व्याधिवर्णनं विस्तरेण वर्णितम्। यद्यपि आयुर्वेदो कस्यवेदस्योपवेदोस्ति। तद्विषये विद्वत्सु–आचार्येषु मतभेदो प्रवर्तते। यथा –

''दैत्यगुरु शुक्राचार्यानुसारेण यस्मिन्नृगवेदोपवेदः स चार्युर्वेदसंज्ञकः।[4]

यथा महर्षिशुक्रो आयुर्वेदं ऋग्वेदस्योपवेदः इति मन्यते। आह भगवानवेदव्यासः स्कन्दो वा।[5]

किन्तु एकाधिकाचार्याः आयुवर्केदस्याविर्भूतवेदं अथर्ववेदं मन्यते। अर्थात् अथर्ववेदस्योपवेदरूपेणायुर्वेदः प्रकल्पितम्। आयुर्वेदस्य सर्वाचार्यञ्च संहिताकारेभ्यः आयुर्वेदस्योद्भावकवेदार्थवेदं मन्यते। यथा महर्षिणा चरकेन–

'' तत्र भिषजा पृष्ठनैवं चतुर्णामृक्सामयजुरथर्ववेदानामात्मनोऽथर्ववेदे भक्तरादश्या।'

वेदोह्यथर्वणो दानस्वस्त्ययनबलिम›लहोमनियमप्रायश्चित्तोपवास–मन्त्रादिपरिग्रहाच्चिकित्सां प्राहः चिकित्सा चायुर्षाहितायोपदिश्यते।[6]

तथैव महर्षिणा काश्यपेन यथा ––

कं वेदं श्रयति अथर्ववेदमित्याह। तत्र हि रक्षाबलिहोमशान्तिः – – – प्रतिकर्मविधानमुद्दिष्टं विशेषेण तद्वदायुर्वेदे तस्मादथर्ववेदं श्रयति।[7]

आचार्यवाग्भट्ट मतेन यथा –

आयुषः पालनं वेदमुखवेदमर्थर्वणः।[8]

ब्रह्मवैवर्तपुराणे आयुवेदावतरणे क्रमेणायुर्वेदो पञ्चमोवेदः इति कथ्यते। यथा –

कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः ।[9]

काश्यपसंहितायामपि महर्षिणा काश्यपेन युक्तयुक्तपद्धतयाः आयुर्वेदो पञ्चमोवदः इति स्थापितः। यथा–––एवमेवामृग्वेद–यजुर्वेदार्थवेदेभ्यः पञ्चमो भवत्यायुर्वेद इति।

– – एवमेव खलुवेदानासु – – – आयुर्वेदमेवानुधावस्ति। तस्माद् ब्रूमः ऋग्वेदयजुर्वेदसामवेदार्थवेदेभ्यः पञ्चमोऽयमायुर्वेदः ।[10]

**आयुर्वेद शब्दस्य निष्पत्तिः –**

विन्दत्यायुर्वेति सम्यगाकृत्यौषघिहेतुतः।
यस्मिन्नृगर्वेदोपवेदः स चायुर्वेदसंज्ञकः।।[11]

इति पृष्ठो वा प्रतिब्रूयात भोः तत्रायुर्जीवितमित्युच्यते। ''विद् ज्ञाने धातुः विदृल लााभे च, आयुरनेन ज्ञानेन ज्ञायते विन्द्यते लभ्यते नशिष्यतीत्यावुर्वेदः ।[12]

आयुरस्मिन् विद्यते अनेन वाऽऽयुर्विन्दत्यायुर्वेदः ।[13]

आयुर्वेदयति ज्ञापयति प्रकृतिज्ञानरसायनद्तारिष्टाद्युपदेशा ।[14]

शरीरेन्द्रियसत्वात्मसंयोगो धाति जीवितम्।
नित्यगश्चानुबन्धश्च पर्य्यायैरायुरुच्यते।।[15]
हिताहितं सुखं दुःखमायुस्तस्य हितातिहम्।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते।।[16]

''आयुः' शब्दस्य निरुक्तिपरकोऽर्थः यथा 'आ' उपसर्गः च युजिर् योगे (धातुयोगेन) व्युत्पन्नं भवति।

आसमन्तात चेतनायाः युनक्ति इति आयुः 'युज' धातुः संयमनार्थे प्रयुज्यते तदा–अस्मन्तात् योजयति इति आयुः, युज् धातुः समाधि अर्थे असमन्तात् चेतनां युज्यते समधीयते। अनेन इति आयुः।

उपर्युक्तार्थत्रयेषु प्रयुक्त 'युज्' धातुना सह 'आ' उपसर्गा यदि योजयेत तर्हि आयुः शब्दो भवति।

अस्य आयुः शब्दस्य व्यापकार्थः – प्रारम्भात् अन्तपर्यन्तं यः शरीरस्य चेतना धातुना सह योजयति संयमित करोति समाधीयते सः आयुः ।[17]

**आयुर्वेदस्य आविर्भावः –**

पुराकाले ब्रह्मणं शाश्वत–अनादि–त्रिसूत्रापूर्वेदस्य स्मरणं कृतम्। भूतसमदायस्य पीडायाः प्रतीकाराय धर्मादिचतुर्विधपुरुषार्थसाधकायुर्वेदं ब्रह्मणा ब्रह्मसंहितायां निबद्धितम्। अतः सृष्टप्राणिनां जीवनं सुखमयं भवति च किमपि कष्ठमुत्यन्नयति तदा तस्य प्रतिकाराय ––।[17]

**सुश्रुतसंहितानुसारेण आयुर्वेदस्याविर्भावः –**

गते सत्ययुगे मानवेषु उत्साह–क्रियाशीलतयोः ह्रास जीवन संसाधनानां सञ्चयवृत्तिः ममतारागयोः उत्पत्तिः परस्परद्रोहः च सदाचारधर्मो त्यक्त्वा अधर्माचरणादीनां फलस्वरूपेण पृथ्वी–जल–देश–काल औषधखण्डादि पदार्थानां गुणेषु ह्रास अभवत्।

धातुसु हासश्च शारीरिकक्रियासु व्यतिक्रमकारणेन रोगान् आक्रमयति।

तदा मनुष्याणां आर्तनादं श्रुत्वा तेषां व्याधिजन्या व्याकुलता च दृष्ट्वा जगदोपकारान् समाजस्य उन्नायकान् ऋषीन् जनजीवनकष्टनिर्मूलाय हिमालय समीपे गोष्ठ्यामायोजनं कृतम्।[18]

संगोष्ठ्यां सम्मिलिताः ऋषयः यथा –

अ।गिरा जमदगनिश्च वशिष्ठ कश्यपो भृगुः।
आत्रेयो गौतमः साङ्ख्यः पुलस्त्यो नारदोऽसितः।।
अगस्त्यो वामदेवश्च मार्कण्डेयाश्चलायनौ।
परीक्षितर्भिक्षुरात्रेयो भरद्वाजः कपिञ्जलः।।
विश्वामित्राश्यौ च भागर्वश्च्वनोऽभिजित्।
गार्ग्यः शाण्डिल्यकौण्डिन्यो वार्क्षिदेवलगालवौ।।
साङ्कृत्यो वैजवापिश्च कुशिको बादरायणः।
बडिशः शश्लोमा च काप्यकात्यानावुभौ।।
काऽायनः कैकशेयो घौम्यो मारीचिकाश्यपौ।
शर्कनाक्षो हिरण्याक्षो लोकाक्षः पैङ्गिरेव च।।
शौनकः शाकुनेयश्च मैत्रेयो मैमतायनिः।
वैखानसा बालखिल्यास्तथा चान्ये महर्षयः।।[19]

एते महषर्यः अस्या समस्यायाः निराकारणाय विचिन्त्य अन्ततोगत्वा देवराज–इन्द्रः इव अस्य रोगशमनस्योपायः दर्शितुं समर्थः इति निश्चित्य।

इन्द्रः सदने गमनाय ऋषभिः ऋषिं भारद्वाजं नियोजितम्।[20]

भरद्वाजेन इन्द्रगृहे गत्वा भृगुरात्रिगौतमादिनां महर्षिणां सन्देशं श्रावितः ।[21] तदन्नतरं महामतीन्द्रेण ऋषिभारद्वाजं स्वस्थपरायणञ्चातुर–परायणहेतु लिङ्ग–औषधज्ञानात्पूर्णस्य पुण्य– शाश्वातायुर्वेदस्य उपदेशः कृतः ।[22]

पुनः इन्द्रात् ज्ञानं प्राप्त्वामहर्षिणा भारद्वाजेन आत्रेयप्रमुखान् ऋषीन् आयुर्वेदोपदेशः कृतः।

महर्षि आत्रेयेण स्वस्य षड्शिष्यान् तान् उपदेशितः। तद्यथा –

1. अग्निवेशः
2. भेलः
3. जंतुकर्णः
4. पराशरः
5. हारितः
6. क्षारयाणि [23]

इमान् षटऋषीन् पृथक–पृथक संहितानां निर्माणं कृतवन्तः। तेषुषट्सु ऋषिषु महर्षि अग्निवेशः सर्वप्रथमं संहिता निर्माणिता ।[23]

अन्ततोगत्वा एतां संहिता चरकेन दृढऋबलेन च पुनः प्रतिसंस्कारिता च सम्पादिता सा इव लोके चरकसंहितारूपेण प्रचलिता।

**चरकसंहितायां चिकित्सास्थाने आयुर्वेदावतरणम् ––**

कुत्रचित्कालेशालीना यायावराश्च ग्राम्यौषध्याहाराः ऋषयः ग्राम्यौषधस्य च आहारास्य कारणेन ऋषयः मन्दचेष्टा च मेदस्वयः बभूवः। तदा ते स्वकरणीय सन्ध्या–वन्दनादिकर्तव्यानामसमर्थः सन्तः। ग्राम्यवासैव सर्वदोषानां कारणं इति ज्ञात्वा मत्वा च ते इन्द्रात् अभिरक्षितं हिमवन्तपर्वते भृगु–अंगिरा–अत्रि–वशिष्ठ–कश्यप–अगस्त्य–पुलस्त्य–वामदेव–असित –गौतमप्रभृतयोः महर्षयः जग्मुः ।[24]

हिमालये ऋषिणां स्वागतं कत्वा ऋषिणां स्वास्थ्यदुर्बलतां प्रति विषदं प्रकटयित्वा एषायुर्वेदोपदेशस्य समयः इति निर्धारित्य इन्द्रेण आयुर्वेदस्योपदेशः कृतः। आत्मनः प्रजानां चानुग्रहार्थमायुर्वेदामश्विनौ मह्यं प्रायच्छतां प्रजापतिरश्विभ्यां प्रजापतये ब्रह्मा [25] तदन्तरं देवराज–इन्द्रेण तान् महर्षीन् आयर्वेदामृतस्य उपदेशः दत्तः। औषधनिर्माणादिकर्मणां शिक्षां दत्ता च ऐन्द्री–ब्राह्मी–भेद्रा–महाभेदादि दिव्यौषधीनां परिचयः कारितः। अस्य प्रकरणे महर्षिभारद्वाजस्य नाम नास्ति। अग्रिमे पंस› कतिपयपण्डिता

इमं प्रस› अधिकं प्रामाणिकं इति मन्यते। कारणं यत् भरद्वाजस्य नाम नास्ति ।[26]

**सुश्रुतसंहितायां आयुर्वेदोद्भवः –**

सर्वदेवानांश्रेष्ठंमहर्षिसमुदायावृत्तं आश्रमस्थकाशीराजं दीवोदासं धनवन्तरि औपधेनव–वैतरण–औरभ्र–पौष्कतलावत् करवीर्य–गोपुररक्षित–सुश्रुतादिभिः प्रभृतिभिः महर्षिभिः मानवकल्याणाय प्रश्नः कृतः ।[27]

तदा ततानुवाच धनवन्तरि यथा –

''इह खल्वायुर्वेदं नामोपा›मर्थवेदद्यैव प्रजाः श्लोकशत–सहस्रमध्यायसहस्रं च कृतवान् सवयम्भूः ततोऽल्पायुष्ट्वमल्यमेधस्त्वं चालोक्य नराणां भूयोऽष्टधा प्रणितावान् ।[28]

तदा धनवन्तरिणा शिष्यानां किं ज्ञातव्यम् कौतुहलवृत्तिं ज्ञात्वा शल्यतन्त्रामुपदेशितम्।

ब्रह्मा–प्रजापति –अश्विनौ–इन्द्र–इन्द्रादहु इति भगवानधनवन्तरि–सुश्रुत इति सुश्रुतस्य परम्परायाः भवति ।[29]

**काश्यपसंहितायां कथा –**

स्वयंभूब्रह्मा प्रजाः सिसृक्षुः प्रजानां परिपालनार्थमायुर्वेदमेवाग्रेऽसृजत्। सर्ववित् ततो विश्वानि भूतानि ततस्तं पुण्यमायुर्वेदमनन्तमायुषो वर्धनमान–धारमाप्यायनमृतमश्विभ्यां कः प्रददौ ताविन्द्राय, इन्द्र ऋषिभ्यश्चतुर्भ्यः कश्यपवशिष्ठात्रिभृगुभ्यः ते पुत्रेभ्यः शिष्येभ्यः शिष्येभ्यश्च प्रददुहितार्थं धर्मार्थकाममोक्षशक्तिपरिपालनार्थं चेति एवमुत्पन्नः ।[30] एवं काश्यपसंहितायां सवार्त्भिन्नायपरम्परा च आयुर्वेदोद्भवप्रसंगे प्राप्यते। यथा अष्टा›हृदये –

ब्रह्मास्मृत्वाऽऽयुषो वेदं प्रजापतिजिग्रहम्।
सोऽश्विनौ तौ सहस्राक्षं सोऽत्रि पुत्रादिकोन्मुनीन्।।
ते अग्निवेशादिकांस्ते तु पृथक तन्त्राणि तेनिरे।
तेभ्योऽतिविप्रप्रकीर्णेभ्यः प्रायः सारतरोच्चयः।।[31]

**अष्टा›संग्रहे आयुर्वेदोत्पत्तिः – –**

आयुर्वेदात्मृतं सार्थं ब्रह्मा बुद्धा सनातनम्।
ददौ दक्षाय सोऽश्विभ्यां तौ शतक्रतवे ततः।।
पुरस्कृत्य पुनर्वसुम्।

धनवन्तरि भरद्वाजनिमिकाश्यप कश्यपः।
तान्दृष्टैव सहस्राक्षो निजगाद् यथागमम्।।
आयुषः पालकं वेदमुपवेदमथर्वर्णेः।
कायबालग्रहोर्ध्वा शल्यदंष्टाजरावृषैः।।
स्थित्यर्थमायुर्वेदस्य तेऽपि तन्त्राणि चक्रिरे।
करालदीश्च सच्छिष्यान् ग्राह्यामासुरादिताः।।[32]

**ब्रह्मवैवर्तपुराणे –**

ऋग्यजुः सामाथर्वाख्यान दृष्ट्वा वेदान् प्रजापतिः।
विचिन्त्य तेषामथवश्चैवायुर्वेदं चकार सः।
कृत्वा तु पञ्चमं वेदं भास्काराय ददौ विभुः।
स्वतन्त्रसंहिता तस्माद् भास्कारश्च चकार सः।।[33]

**पितामह ब्रह्मा (आयुर्वेदावतरणम्)**

⇓

| ⇓ | ⇓ | ⇓ | ⇓ | ⇓ |
|---|---|---|---|---|
| चरकसंहिता | सुश्रुतसंहिता | काश्यपसंहिता | अष्टा›संग्रह | ब्रह्मवैवर्तपुराण |
| आत्रेयपुनर्वसु सिद्धान्तः | धनवन्तरिसंप्रदायः | ⇓ | ⇓ | ⇓ |
| ⇓ | ⇓ | अश्विनकुमारौ | दक्षप्रजापतिः | प्रजापतिदक्ष |
| दक्षप्रजापति | दक्षप्रजापति | ⇓ | ⇓ | ⇓ |
| ⇓ | ⇓ | देवराजइन्द्र | दस्त्रः च नास्यः | भास्करः |
| अश्विनकुमारौ | अश्विनौ | | ⇓ | |
| ⇓ | ⇓ | | शतक्रतवः | |
| देवराजइन्द्रः | इन्द्रराजा | | | |
| ⇓ | ⇓ | | | |
| महर्षिभारद्वाज | धनवन्तरि | | | |
| ⇓ | | | | |
| महर्षिआत्रेय पुनर्वसुः | | | | |

:

**धनवन्तरि**

⇓

| ⇓ | ⇓ | ⇓ | ⇓ | ⇓ |
|---|---|---|---|---|
| महर्षिसुश्रुत | महर्षिऔरभः | ऋर्षिपौष्कलावतः | ऋषिवैतरणः | ऋषिकरवीर्यः |

**देवराजइन्द्र**

⇓

| ⇓ | ⇓ | ⇓ | ⇓ | ⇓ |
|---|---|---|---|---|
| महर्षिसुश्रुत | महर्षिऔरभः | ऋर्षिपौष्कलावतः | ऋषिवैतरणः | ऋषिकरवीर्यः |

**देवराजइन्द्र**

⇓

| ⇓ | ⇓ | ⇓ | ⇓ | ⇓ |
|---|---|---|---|---|
| महर्षिकश्यपः | महर्षिवशिष्ठः | महर्षि अत्रि | महर्षिभृगुः | अन्यः |
| | | ⇓ | ⇓ | |
| | | अत्रिपुत्राः | शिष्याः | |

**शतक्रतवः**

⇓

⇓ भगवान धनवन्तरि ⇓ महर्षिकश्यप ⇓ महर्षिभारद्वाज ⇓ ऋर्षिपुनवर्सुः ⇓ महर्षि आलम्बायन ⇓ महाराजनिमि

⇓

⇓ महर्षि–अग्निवेशः ⇓ महर्षिभेलः ⇓ महर्षिजन्तुकर्णः ⇓ महर्षिहारितः ⇓ महर्षिपाराशरः ⇓ महर्षिक्षारपाणिः

**भास्करः**

⇓

⇓ भगवान ⇓ दिवोदासः ⇓ काशिराजः ⇓ अश्विनीकुमारौ ⇓ नकुलः ⇓ सहदेवः ⇓ चमूराजा ⇓ महर्षिच्यव ⇓ महाराजजनकः

⇓

⇓ बुधः ⇓ ऋषजाकलः ⇓ ऋर्षिजांजलिः ⇓ महर्षिपैलः ⇓ आचार्यकवथ ⇓ महर्षिअगस्त्य

**भगवानधन्वन्तरिः – महाराज निमि**

⇓

⇓ भगवानधन्वन्तरिः ⇓ महर्षिकश्यप ⇓ महर्षिभारद्वाज ⇓ महर्षिपुनर्वसुः ⇓ महर्षि आलम्बायन ⇓ महर्षिनिमि

**आयुर्वेदस्याष्टाङ्गानि – –**

शल्यशलाक्यकायञ्च तथा बालचिकित्सतम्।
अगदंविषतन्त्रश्च भुतविद्या रसायनम्।।
वाजीकरणमेवेति चिकित्सा चाष्टधास्मृता।।[34]

कत्य›श्चायुर्वेद इति अष्टाङ्गः
तस्य कौमारभृत्यं'कायचिकित्सा–शल्याहतृकं
शालाक्यं विषतन्त्रं–भूततन्त्रमगदतन्त्रंरसायनतन्त्रमिति।[35]

तद्यथा शल्यं शालाक्यं कायचिकित्सा
भूतविद्या कौमारभृत्यम् अगदतन्त्रं रसायनतन्त्रं
वाजीकरणतन्त्रमिति।[36]

क्रियतेऽष्टाङ्गहृदय नातिसंक्षेपविस्तरम्।
कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषान्।।[37]

**कायचिकित्सा –**

कायः अर्थात् शरीरचिकित्सा ''कायः'' शब्दो ''चिञ्चयने' धातुतः व्युतपनयति। यस्य निरुक्तपरकोऽर्थः 'चीयते' अन्नादिभिः इति – यः अन्नाद पोषयति सः कायः। कायः शब्दात् 'अग्नि' अग्नेरपि बोधयति। शरीरान्तर्गताग्निः आहारद्रव्यानां पाचनञ्च सर्वाङ्गशरीरं पोषयति। यदा अग्नेः कार्येषु दोषः आगच्छति तदा शरीरगतनिजरोगाणां प्रादुर्भावो जातः। अतः अग्नेः चिकित्सा अर्थात् कायचिकित्सा कायचिकित्सायां शरीरगतज्वर–रक्त पित्त–शोक्ष–उन्माद–अपस्मार–प्रमेह–अतिसारादिनां व्याधीनां उपचारं क्रियते। यथा सुश्रुतसंहितायाः –

कायचिकित्सा नाम सर्वा›संश्रितानां व्याधिनां ज्वररक्तपित्त–शोधोन्मादापस्मारकुष्ठमेहातिसारदीनामुपशमनार्थम्।। [38]

यथा हारितसंहितायां –

कषायचूर्णगुटिका पञ्चानां शोधनानि च।
कोष्ठमयानां शमनीक्रिया कायचिकित्सितम्।।[39]

**शल्यचिकित्सा –**

तत्र शल्यं नाम विविधतृणकाष्ठपाषाणपांशु लौहलोष्टास्थिबालनख–यूयास्त्रावदुष्टव्रणान्तर्गर्भशल्योद्धारणार्थ यन्त्रशस्त्रक्षारणविनियार्थ च ।[40]

''शल् हिंसायम् धातोः शल्य शब्दो भवति। यस्य निरुक्तपराकोऽर्थः पीड़ाकारकं शल्यमयपनेतु कृतं यत् शास्त्रं तत् शल्यम् ।''

शरीरे पीडादायक तथाहि तृण–पाषाण–लोह––अस्थि–बाल्–नख–पूय–अस्त्राव–दुष्टव्रण–दुष्टगर्भादिन् पदार्थान् बहिनिष्कासनाय शरीरगतरोगानां निदानाय च उपचाराय यन्त्र–शस्त्र–क्षार–अग्नेः उपयोगे यं शास्त्रं प्रवृत्तंमस्ति तं शास्त्रं शल्यम् इति।

महर्षिहारितवचनाद् यथा –

यन्त्रशास्त्रार्थबन्धैस्तु येन चोद्धियते भिषक्।
तञ्च शल्योद्धरणकं प्रोच्यते वैद्यकागमे।।
नाराचवालवल्लीभिर्भल्लैः कुन्तैश्च तोमरैः।
शिलाग्निभिन्नगात्रस्य तत्र सार्य्यादिशल्यकम्।।[42]

तत्प्रतीकारणं तञ्च शल्यचिकित्सकम्।
तथा वाणसमुष्टितृणपाशुकृमीकचम्।।
रक्तवस्तु तथा येशी पूयं शेषान्तरेऽपि यत्।
तच्छल्यमिति जानीयाल्लोष्ठकाष्ठविभिन्नकम्।।[43]

**शालाक्यः –**

शालाक्यं नामोध्वजत्रुगतानां श्रवणनयनवदनघ्राणादिसंश्रितानां व्याधी–नांमुपशमनार्थम्।[44]

श्लाकायाः कर्म शालाक्यम्।

शलाकाधारेण रोगनिदानञ्चोपचारं भवति तत्शालाक्यम्। येषु श्लोकायाः प्रधानता स्यात् तत्तन्त्रं शालाक्यतन्त्रम्। कर्ण–नासिका–मुख गतरोगाणामुपचाराय च तत्र श्लोाकायन्त्रस्योपयोगिताकारणेन अस्य शास्त्रस्यनाम् शालाक्यतन्त्रं कथ्यते। यथा महर्षि हारितः ––

शिरोरोगा नेत्ररोगाः कर्णरोगाविशेषतः।
भ्रूकण्ठशंखमन्यासु ये रोगः सम्भवन्ति हि।।

तेषां प्रतीकारकर्म नासावर्त्यञ्जनानि च।

अभ्य› मुखगण्डूषक्रियाशलाक्यनामिका।।[45] इति शालाक्यं नाम।

**भूतविद्या –**

भूतविद्या नाम देवासुरगन्धर्वयक्षरक्षः पितृ पिशाचनागग्रहाद्युपसृष्टचेतसां शान्तकर्मबलिहरणादिग्रहोपशमनार्थम्। [46]

भूतानि देवासुरौ गान्धर्व यक्ष–राक्षस–पितृ–नाग–पिशाचाः अष्टौ तानि वेत्ति अनया इति भूतविद्या तान् सर्वान् यस्याः विद्यायाः वा यस्मात् ज्ञानात् ज्ञातुं शक्यते। सा विद्या वा तत्ज्ञानं इत्युक्ते भूतविद्या, तेषां सर्वानां भूतनामवेषान् प्रभावितचित्तयुक्तमनुष्येभ्यः शान्तिकर्मञ्च तत्सम्बन्धिग्रहाणां निमित्ताय बलि कर्मादिकर्मेभ्यः शमनाय् प्रपृतं शास्त्रं इत्युक्ते भूतविद्याा।

यथा नारदसंहितायाः –

ग्रहभूतपिशाचाश्च शाकिनीडाकिनीग्रहाः।
एतेषां निग्रहः सम्यग्भूतविद्या निगद्यते।।[47]

**कौमारभृत्यः** –

कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधननार्थं दुष्टस्तन्यग्रह –समुत्था च व्याधीनामुपशमनार्थम्।[48]

आयुर्वेदे कौमारभृत्यशाखायां बालकानां पोषणार्थे च धात्र्याः दुग्धक्षीरदोषं निवारणार्थं च दूषित दुग्धान् च बलग्रहात् उत्पन्नबालकानां व्याधिनामुपचारे प्रवृतार्युवेदशाखाायाः नाम कौमारभृत्यम्।

यथा हारितसंहितायाः

ग्र्भोपक्रमविज्ञानं सूतिकोपक्रमस्तथा।
बालानांरोगशमनी क्रिया बालचिकित्सतम्।। [49]

**अगदतन्त्रम् –**

न गदः अगदः अगदाय तन्त्रम् अगदतन्त्रम्। अस्य निरुक्तिपरकस्य अगदतन्त्रस्याभिप्रायं यत् यः गदः नास्ति सोऽगदः इति। अगदाय प्रवृतंशास्त्रं अगदतन्त्रं वा शास्त्रमुच्यते। सर्प–कीट–मर्कटादीनां कीटकप्राणीनां दंशनाय दन्तक्षताय उत्पन्नलक्षणाय निदानाय च पृथक–पृथक विषयाणां संयोग लक्षणानां उपचाराय प्रवृतंशास्त्रं इति अगदतन्त्रम्। यथा सुश्रुतसंहितायाः –

अगदतन्त्रम नाम सर्पकीटलूतामूषकादिष्टविषव्यञ्जनार्थं विविधविष संयोगपशमानार्थ चं ।[50]

यथा हरित संहितायां –

गुदामयं बस्तिरुजं शमनं बस्तिरुदकम्।
आस्थाप्यनानुवासन्तु अगदं नाम एव च।।[51]

**रसायनतन्त्रम् –**

रसायनतन्त्रं नाम वयः स्थापनमायुर्वेधाबलंकरं रोगापहरणसमर्थं च ।[52]

वयं यथायोग्ये प्रकृतिस्थभावे स्थापनाय च आयुर्वधनाय च मेघाविकासाय च बलविवर्धनाय च रोगायहरणाय प्रवृतंशास्त्रं इति रसायनतन्त्रम्। यथा हारितसंहितायाः –

देहस्येन्द्रिय दन्तानां दृढ़ीकरणेव च।
वलीयलितखालित्यवर्जनेऽपि च या क्रिया।
पूर्वं वैधप्रणीतं हि तद्रासायनमुच्यते।।[53]

**वाजीकरणतन्त्रम् –**

वाजीकरणतन्त्रं नामाल्यदुष्टक्षीणविशुष्करेत।
सामाप्यायनप्रसादोपचयजननमित्तिं प्रहर्षजननार्थं च।।[54]

आचार्य चक्रपाणि–अनुसारेण अवाजी वाजीव अत्यर्थमैथुने शक्तः क्रियते येन तद्वाजीकरणम्। अल्पशुक्रयुक्त दूषितशुक्रयुक्त–क्षीणशुक्रयुक्त विशुष्क वा अत्यन्तक्षीणशुक्रयुक्तमानवाय क्रमेण वृद्धि शुद्धिकरण पुष्टिकरण–शुक्रजननस्य निमित्ताय च शुक्रवृद्धिस्त्रावनिर्मिताय प्रवृतंशास्त्रं वाजिकरणशास्त्रं कथ्यते। यथा महर्षि हारितः –

क्षीणानां चाल्पवीर्याणां वृहणं बलवर्द्धनम्।
तर्पण समधातूनां वाजीकरणमुच्यते।।[55]

एवं मानवस्य समपूर्णजीवनस्य स्वास्थं च रोगोपचारायायुर्वेदंमष्टा›षु विभाजितं कृतम्। तेनाधारेण सर्वानानां›ानां विस्तृतमुपदेशं कृत्वा प्राचीन–आयुर्वेदज्ञ–मनीषिभिः मानवान् स्वस्थं च सुखमयजीवनं प्रदत्तम्।

## कतिपयवेदग्रन्थानां परिचयः

**चरकसंहिता –**

ज्यत्यसौ सोऽखिलशास्त्रविद्याकल्पद्रुमः सर्वफलोदयत्वात्।। इति आचार्येणग›ाधरेण कविराजेन चरकसहितायाः जल्पकल्तरुटीकायां चरकसंहितायै कथितम्।

चरकसंहिता कार्यचिकित्सायाः सर्वोत्कृष्टश्च धुरन्धरो ग्रन्थोऽस्ति। संहितायाः मूलनां 'अग्निवेशतन्त्रम् आसीत्। यस्य निर्माणमग्निवेशेन कृतम्। अग्निवेशो पुनर्वसु–आत्रेयस्य षट्शिष्येषु प्रमुखोऽऽसीत्। तेषु अग्निवेशेन महर्षि आत्रेयस्य उपदेशानां सूत्ररूपेण सङ्कलनं कृतम्। सङ्कलनं सूत्ररूपेण संक्षिप्तमासीत्। यस्य प्रतिसंस्करणं महर्षिचरकेन नवीनविषयानां समावेशो –कृत्वाग्निवेशातन्त्रस्योपबृहणं कृतम्। पुनः आचार्यदृढ़बलेन अन्यतप्रतिसंस्कारो कृत्वा वर्तमानकाले उपलब्धायाः चरकसंहितायाः एतत्स्वरूपं प्रदत्तम्।

आचार्यविद्याधर शुक्लमहोदय–चरकस्य प्रतिसस्करणविषये कथ्यते यत् अनेन चरकेन अग्निवेशतन्त्रस्य प्रतिसंस्कारं कृत्वा ग्रन्थमन्यन्तं समृद्धं कृतं येन कारणेन तन्त्रं आयुर्वेदस्य विश्वकोश एव बभूव। यस्य एकमेवग्रन्थस्य सम्यग्काध्ययनात् कायचिकित्सायाः परिनिष्ठतज्ञानं अर्जितं क्रियते। आचार्यचरकेन अग्निवेशतन्त्रस्य कलेवरं नवीनतमशास्त्रमर्यादाः च विषयवैपुल्यात् सुसज्जितं कृत्वा संहितारूपं प्रदत्तम्।[56]

चरकसंहितायाः विषयः अष्ठस्थानेषु च 120 अध्यायेषु विवरणितम्–

सूत्रस्थाने – 30 अध्यायाः
निदानस्थाने – 08 अध्यायाः
विमानस्थाने – 08 अध्यायाः
शरीरस्थाने – 08 अध्यायाः
इन्द्रियस्थाने – 12 अध्यायाः
चिकित्सास्थाने – 30 अध्यायाः
कल्पस्थाने – 12 अध्यायाः
सिद्धस्थाने – 12 अध्यायाः

इदृशी चरकसंहिताग्रन्थे सर्वे मिलित्वा 120 अध्यायाः सन्ति इति।

वैदिकशैलीं स्वीकृत्य चरकसहितायां सूत्रस्थाने चत्वाराध्यायां एक–एक चतुष्कं रचितम्। यथा – औषधचतुष्कं–स्वास्थ्यचतुष्कं इत्यादयः। तत्र त्रिसूत्रायुर्वेद–असात्येमन्द्रियार्थसंयोगः प्रज्ञापराधः परिणाम वा काल–लिङ्गेषुधज्ञानादि विषयानि वर्णितानि सन्ति।

सूत्रस्थाने प्रथमेऽध्याये योनिभेदात् द्रव्यत्रयं वर्णितम्। औषधद्रव्यानां वर्णीकरणं कर्मानुसारेण उपलब्धम् अस्ति। तत्र दोषप्रभावदृष्ट्यां द्रव्यानां त्रयवर्गेषु विभाजयति। दोषप्रशमन–धातुप्रदूषण–स्वस्थहितच्च। अष्टस्थानेषु ताः कल्पनामुक्तख्ये

स्वरस–कल्क–चूर्ण–वटिका–गुटिका–क्वाथ–आसव–अरिष्ट–कवल–गण्डूष–पीयूष–दधि–धूमपान–शार्कर–लाजमण्ड–शिण्डा की विण्डकेक्त्यादि 128 कल्पनाः विभक्ताः।

भ्रूण–शारीर–क्रियात्मकशरीर–हेतु–लि›–औषधि–जीवनस्याध्यात्मज्ञानं–निदान–व्यावहारिकपक्षरसायन–स्वास्थ्यसरंक्षण–संशोधन–बाजीकरणा– परिमार्जन–चिकित्सा लाक्षणिकचिकित्सादीनां विषयाणां विस्तृत–फलके वर्णितम् अस्ति।

**भेलसंहिता –**

सा आत्रेयसम्प्रदायस्य द्वितीयसंहिता महर्षिभेलोऽपि अग्निवेशस्य समकालीनाचार्यः आसीत्। वर्तमानकाले अस्या संहितायाः मूलपाठ–खण्डितरूपेण उपलभ्यते। कतिपयाध्यायाः पूर्णरूपेणलुप्ताः शेषोपलब्धापि खण्डितवस्थायां प्राप्नोति।

अनेक प्रमाणाधारेण वर्तमाने प्रचलिता भेलसंहिताः मूलऋषिः प्रणीता नास्ति। तत्समयस्य भाषा दार्शनिकतायाः पुटः गुरुशिष्य–संवाद–संहितायाः शैली भाषा प्राञ्जलतादिनां अस्य ग्रन्थे अभावोऽस्ति। गन्थस्य योजना पूर्णतः चरकानुरूपा प्रतीता इति।[57]

**काश्यपसंहिता –**

कौमारभृत्यविषये स्वतन्त्र–आर्ष–ग्रन्थो काश्यपसंहिता–वृद्धजीवकीय– तन्त्ररूपेण उपलभ्यते। अस्य ग्रन्थस्य रचनाकारो महर्षिकाश्यपो आसीत्। ग्रन्थ कुमाराणां वा बालकानां जन्मादारभ्य युवावस्थापर्यन्तं भवितानां रोगणां वर्णनं प्राप्यते।

गर्भिण्याः स्त्रियाः विकाराः च प्रसवकालिनकाष्टानां विवेचनं च तेभ्यः आवश्यकाहारविहारयोः विधानं दर्शितम्।

ग्रन्थे मारिचि–काश्यपो नाममहर्षिभिः शिशुः च बालरोगा, बालानां लाजनाय पालनाय, स्तन्यशोधन, छात्रीचिकित्साभेदेन च विषयान् स्वीकृत्य बृहदग्रन्थकाश्यपसंहिता निर्मितम्।

शतकेभ्यः ग्रन्थो नामशेषः आसीत्। अधुना नेपालरागुरु पं. हेमराजशर्मणा द्वारा प्राप्तो ग्रन्थः आचार्ययादवस्य प्रचारेणैव प्रकाशितो जातः।

**हारीतसंहिता –**

महर्षिभेलसदृशः महर्षिहारितोऽपि भगवानपुनर्वसुआत्रेयस्य शिष्योऽसीत्। यथा –

अग्निवेशश्च भेलश्च जंतुकर्णः पराशरः।
हारीतः क्षारपाणिश्च जगृहुस्तन्मुनेर्वचः।।

अतः महर्षिहारितविरचिता संहिताऽपि आत्रेयसम्प्रदायस्य अस्ति। महर्षिहारितोऽऽत्रेयस्य शिष्योऽऽसीत्। भेलाग्निवेशयोः सहाध्यायी अपि आसीत्। अतः तयोः द्वयोः समकालिकननामस्ति।

तत्रग्रन्थानुसारेण शिवं नमस्कारं कृत्वा मङ्गलाचारं कृत्वा[58] ग्रन्थारम्भो कृतः।

सिद्धग्रन्धर्वसेविते हिमवदुत्तरे शान्तशिखरे तपसा युक्तं आत्रेयं बहुशिष्येस्तु विराजतं। तत्रस्थशिष्यो हारितः सर्वज्ञानमिदं प्रपच्छ।[59] तदा प्रहस्योत्फूल्लोचनः महर्षि आ़त्रेयः रोगसमुत्पत्ति–उपचार–प्रचारः च तेषां कथं सिद्धं भवत्यादीनां एतत्सम्यकज्ञानं प्रत्युवाच।

संहितायाः परिमाणविषये महर्षिआत्रेयोक्तः। यथा –

चतुर्विंशसहस्रैस्तु मयोक्ता चाद्यसंहिता।
तथा द्वादशसाहस्री द्वितीया संहिता मता।।
तृतीया षटसहस्रैस्तु चतुर्थी त्रिभिः च।
पञ्चमी दिव्यञ्चयै तेः प्रोक्ताः पञ्वान संहिता।
तस्माच्चाल्परेणाऽपि वक्ष्यामि श्रृणु पुत्रक।।[60]

**हारितसंहिता**

⇓

| ⇓ | ⇓ | ⇓ | ⇓ | ⇓ |
|---|---|---|---|---|
| 240000 | 12000 | 6100 | 3000 | 1500 |

तत्र प्रथमस्थाने पूर्वभूमिका चिकित्सासंग्रह वैद्यशिक्षविधानं–देशकाल बलाबल वायुज्ञान–रस–जलवर्ग–दुग्धवर्ग–मूत्रवर्ग–इक्षुवर्ग–काञ्चीकीवर्ग–मण्डवर्ग–यूषवर्ग–धान्यवर्ग–शाकवर्ग–फलवर्गे–स्वप्नवर्ग–मधुवर्ग–मद्यवर्ग–मत्स्यवर्ग–अन्नवर्ग–स्वप्नविषय–नक्षत्रज्ञान–यज्ञ–शकून व–वर्णनाम् –ज्वरचिकित्सा– अतिसार–गुल्म–कृमिरोग–शूल–पाण्डुरोग–क्षय–रक्तपित्त्–अर्ष–कसा– मुर्च्छा–निन्द्रा–अपस्मार–उन्माद् आदीनां विषयानां च रोगनां विषद्वर्णनं प्राप्यते।

**सुश्रुतसंहिता –**

सुश्रुतसंहिता धनवन्तरि सम्प्रदायस्य शल्यचिकित्सायाः आद्य ग्रन्थो अस्ति। बृहद्त्रयेषु अस्यग्रन्थस्य स्थानंद्वितीयम्। मूलसंहिता प×चस्थानेषु विभकता च कुलस्थानानां अध्यायानां संख्या आचार्यचरकस्यैव 120 अस्ति। उत्तरतन्त्रसय 66 अध्यायाः आचार्यनागार्जुनेन संलग्नोकृतः। तत्र पञ्चस्थानानि सन्ति। तत्र शताधिकविंशति अध्यायान् सूत्र–निदान–शरीरचिकित्सा च कल्पादिषु पञ्चस्थानेषु विभक्तितम्।

1. सूत्रस्थाने – 46
2. निदानस्थाने – 16
3. शारीरस्थाने – 10
4. चिकित्सायां – 40
5. कल्पे – 08

———————————————

सर्वे मिलित्वा 120 अध्यायाः सन्ति। तत्र उत्तरतन्त्रप्रकीणरूपेण 66 अध्यायाः सन्ति। कायचिकित्सायै महर्षिचरकस्य च शल्य–शालाक्यचिकित्सायै महर्षि सुश्रुतस्याध्ययनं प्राचीनकालात् प्रचलितमस्ति।

महर्षिसुश्रुतः भगवानधनवन्तरेः शिष्योऽऽसीत्। तथा च धनवन्तरेः शल्यचिकित्सायाः ज्ञानं प्राप्त्वा–स्वानुभवेन विस्तारितम्। तदा धनवन्तरेः समकालिनञ्च शल्यचिकित्सायाः विद्वन्वैदेहनिमेः च शालाक्यशास्त्रस्य–विद्वानभटात् शिष्यभावेन सुश्रुतः ज्ञानप्राप्तं कृतम्। [62]

शल्यतन्त्रस्य क्रियात्मक ज्ञानार्पणाय अस्य संहितायाः निर्माणं कृता। तत्र कमलनाल–मृतपशुदेहे शल्य–शिक्षा–छेदन–भेदन–एषण–आहार्यकार्य वस्त्रसीवन–मृतिकायाः वा काष्ठस्य क्रीडनीयके पट्टीकर्मभ्यास मांसखण्डेकपटकर्म–अग्निकर्मादीनां अभ्यासानां वर्णनमस्ति।

अस्मिन् ग्रन्थे रोगी–शय्या वृणितागारस्य (हॉस्पिटल)उल्लेखो प्राप्यते। शतकाधिकविंशति यन्त्राणि दर्शितानि। यन्त्राणां प्रधानो हस्तः दर्शितः। स्वास्तिक–सदंश–ताल–नाड़ी–शलाका–उपयन्त्र–उपयन्त्रादि षटप्रकारस्य यन्त्राणि दर्शितानि।

आचार्यसुश्रुतेन शवच्छेदस्य सर्वप्रथमं वर्णनं कृतम्। कपोलमासं कर्तयित्वा नासिकानिर्माणस्योल्लेखः च भगन्दर–अश्मरी–अर्श–अर्बुद–मूत्र

–गर्भ– ब्रण–उदरोगादीनां रुग्णानां वर्णनं च उपचारादि विस्तृत विवेचनं सुश्रुतेन कृतम्।

तदुपरान्तं बृहदत्रयेषु आचार्यवाग्भटस्य अष्टा›हृदस्य ग्रन्थस्योपि गणनां क्रियते। ग्रन्थकारेण स्वस्यग्रन्थामायुर्वेदः वाङ्मयरूपीसमुद्रस्य हृदयम् इति कथ्यते। आचार्यस्य द्वितीयग्रन्थः 'अष्टा›संग्रहम्' अस्ति।

आत्रेयसम्प्रदाये कार्यचिकित्सायां तथा च शल्यचिकित्सायां ग्रन्थस्य ईदृशं प्राप्यते। तद्यथा –आत्रेयसम्प्रदाये –

## 1.कार्यचिकित्सायाम्

| | | | |
|---|---|---|---|
| 1 | अग्निवेशतन्त्रम् | 6 | विश्वमित्रसंहिता |
| 2 | भेलसंहिता | 7 | आत्रेयसंहिता |
| 3 | जातुकर्णसंहिता | 8 | पराशर संहिता |
| 4 | हारितसंहिता | 9 | क्षारपाणिसंहिता |
| 5 | खरनादसंहिता | 10 | |

## 2.शल्यचिकित्सायाम्

| | | | |
|---|---|---|---|
| 1 | औपघेरनतन्त्रम् | 2 | औरभतन्त्रम् |
| 2 | वृद्धसुश्रुतसंहिता | 4 | पौष्कलावततन्त्रम् |
| 5 | वैतरणतन्त्रम् | 6 | भोजसंहिता |
| 7 | करवीर्यसंहिता | 8 | गोपुररक्षिततन्त्रम् |
| 9 | भालुकतन्त्रम् | 10 | कपिलतन्त्रम् |
| 11 | गौतमतन्त्रम् | | |

## 3.शालाक्य–चिकित्सायाम्

| | | | |
|---|---|---|---|
| 1 | विदेहतन्त्रम् | 2 | निमितन्त्रम् |
| 2 | काškयनतन्त्रम् | 4 | गार्ग्यतन्त्रम् |
| 5 | गालवतन्त्रम् | 6 | सात्यकतन्त्रम् |
| 7 | शौनकतन्त्रम् | 8 | करालतन्त्रम् |
| 9 | चक्षुष्यतन्त्रम् | 10 | कृष्णात्रेय तन्त्रम् |

**4.कौमार–भृत्ये**

1. जीवकतन्त्रम्
2. बन्धकतन्त्रम्
3. पार्वतकतान्त्रम्
4. हिरण्याक्ष तन्त्रम्

**5.अगद–चिकित्सायाम्**

1. काश्यपसंहिता
2. अलम्बायनसंहिता
3. उशनसंहिता
4. सनकसंहिता
5. लाटयायनतन्त्रम्

**6.रसायन–चिकित्सायाम्**

1. पातञ्जलतन्त्रम्
2. व्याण्डितन्त्रम्
3. वशिष्ठतन्त्रम्
4. माण्डव्यतन्त्रम्
5. नागार्जुनतन्त्रम्

7.**वाजीकरणे** –महर्षिवात्स्यायन प्रणीते कामसूत्रे एवं समुपलभ्यते 'कौचुमारः, औपनिषदिकम् इति तदेतत् कुचुमारतन्त्रं।[63]

**8.भूतविद्यायां** तु कस्यापि न सता ज्ञायते। सुश्रुतादौ भूतविद्याबीजं तु लभ्यते।

**स्थापत्यवेदः –**

प्रासादप्रतिमारामगृहवाप्यादिसत्कृतिः।
कथित यत्र तच्छिल्पशास्त्रुक्तं महर्षिभिः।।[64]

प्रत्येकवेदस्य एकैकोपवेदोऽस्ति। तदनुसारेण महर्षिशुक्र वास्तुविद्यांमपि 'उपवेद' इति कथ्यते। चत्वारवेदेषु कुत्रचित्ऋग्वेदेन वा कुत्रचिदर्थवेदेन तस्य स्थापत्यवेदस्य किं वा वास्तुवेदस्य सम्बद्धं स्थापितमस्ति। पुराणेषु मत्स्यपुराणं–अग्निपुराणं–गरुणपुराणं–स्कन्दपुराणं–लि›पुराणं–नारदपुराणं–ब्रह्मवैवर्त– पुराणं –विष्णुधर्मोत्तरादि पुराणेषु स्थापत्यस्य विस्तारेण विषयानुसारेण प्रदर्शनमस्ति। रामायणे–महाभारते– च तस्य निरूपणं प्राप्नोति।

वास्तुशास्त्रं आर्यवर्तस्य शास्त्रमस्ति। वेदेषु अपि तस्योल्लेखः प्राप्नोति। वेदे 'वास्तोष्यतेः नाम्नः वास्तुदेवस्य सूक्तमस्ति। तत्र देवानां शिल्पीविश्वकर्मणः अपि सूक्तानि सन्ति। वेदे च वेदा› सूत्रग्रन्थेषु यज्ञवेदि च यज्ञशलाका निर्माणाय उपयुज्य वास्तुवर्णनं प्राप्नोति।
'वास्तु' शब्दो निवासस्थलस्य पर्यायोऽस्ति। दानवजमयेन तस्य परिभाषा ईदृशी दत्ता यथा ––

अमर्त्याञ्चैव मर्त्याश्चैव यत्र यत्र वसन्ति हि।

तद् वस्त्विति मतं तज्ज्ञैस्त द्वेवं च वदाम्यहम्।।[65]

''देवाः वा मानवाः यत्र–यत्र स्थायी वा अस्थायीभावेन निवसन्ति ततद्वास्तु'' वसन्ति प्राणिनो यत्र

वस निवासे + वसेर गारे णिच्च।[66]

तैतिलाश्च नगणचैव यस्मिन्यस्मिन परिष्ठिताः।

तद्वस्तु सूरिभिः प्रोक्तं तथा वै वक्ष्यतेऽधुना।।[67]

मयमतकारे स्थापत्यस्याधिकारक्षेत्रमपि स्पष्टं करोति यथा –

भूमि–प्रासाद–यानानि शयनं च चतुर्विधम्।

भूरेव मुख्यवस्तु स्यात् तत्र जातानि यानि हि ।।[68]

अर्थात् मुनिमयानुसारेण भूमिः भवन–यान– शयानादिनां आश्रयमस्ति। भुमिरेव मुख्यवस्तु अस्ति। अतः भूरेव वस्तु इति मन्यते। भूम्याधारेणा–वलम्बित भवन–यान–शयनादिनां वास्तुः इति प्रकीर्तितम्। यथा –

प्रसादादीनि वस्तुनि वस्तुत्वाद वस्तुसंश्रयात्।

वस्तुन्येव हि तान्येव प्रोक्तान्यसिमन् पुरातनैः।।[69]

भगवन् विश्वकर्मणः विश्वकर्मप्रकाश वा वास्तुतन्त्रग्रनथे वास्तोः आचार्य –परम्परा दर्शिता यथा –

यदुक्तं शम्भुना पूर्वं वास्तुशास्त्रं पुरातनम्।

पराशरः प्राह बृहदरथाय बृहद्रथः प्राह च विश्वकर्मणे।

स विश्वकर्मा जगतःहिताय प्रोवाच शास्त्रं बहुभेदयुक्तम्।।[70]

उत्तरभागे द्वितीया परम्परा प्रदर्शिता तस्मिन्नेव ग्रन्थे। यथा–

इति प्रोक्तं वास्तुशास्त्रं पूर्वं गर्गाय धीमते।
गर्गात्पराशरः प्राप्तस्मात्प्राप्तो बृहद्रथः।
बृहद्रथा द्विश्वकर्मी प्राप्तवान् वास्तुशास्त्रम्।
स विश्वकर्मा जगतोहितायाऽभयत् पुनः।
वासुदेवादिषु पुनर्भूलोके भक्तितोऽब्रवीत्।।[71]

## वास्तुशास्त्रस्य आचार्यपरम्परा

⇓

| उत्तरापथीयपरम्परा | दक्षिणापथीयपरम्परा |
|---|---|
| ⇓ | ⇓ |
| महादेवशम्भुः | पितामहब्रह्मा |
| ⇓ | ⇓ |
| महर्षिअत्रि | ऋषिः त्वष्टाः |
| ⇓ | ⇓ |
| ऋषिपराशरः | ऋषिमातंग |
| ⇓ | ⇓ |
| भगवानविश्वकर्मा | महर्षिभृगुः |
| ⇓ | ⇓ |
| मुनिवरगर्गः | महर्षिकाश्यप |
| ⇓ | ⇓ |
| ब्रह्मर्षिवशिष्ठः | महर्षि अगस्त्य |
| ⇓ | ⇓ |
| आचार्यबृहद्रथः | दैत्यगुरुशुक्राचार्य |
| ⇓ | ⇓ |
| भगवान्वासुदेवः | ऋषिःपराशर |
| | ⇓ |
| | आचार्य नग्नजित् |
| | ⇓ |
| | देवर्षिनारदः |
| | ⇓ |
| | भक्तराजप्रहलादः |
| | ⇓ |
| | देवराजशुक्र |
| | ⇓ |
| | देवगुरुवृहस्पतिः |

प्रथम परम्परायाः प्रवर्तको भगवान् विश्कर्मा द्वितीया परम्परायाः प्रवर्तको दानवराजमयश्च स्वीकृतम्।

तस्याःकृते च हेमायाः सर्वं हेममयं पुरम्।
वज्रवैदुर्यचित्रं च मायया निर्मितं मया।
तत्राहमवसं दीनस्तया हीनः सदुःखितः।।[75]

एवं च तेन मयेन पुनः हनुमान्दग्धालङ्कापूर्यां पुनः जीर्णोद्वारमपि कृतम्।[76]

महाभारतेऽपि कृष्णार्जुनौ खाण्डवदहनकाले मयदानवस्य रक्षणं कृत्वा युधिष्ठिराय सभागारं तेन मयेन निर्माणितम् यथा –

तस्मिन्वने दहयमाने षड्ग्निं ददाह च।
अश्वसेन मयं चैव चतुरः शार्ङ्गकांस्तथा।।[77]

मयदानवः स्वस्यपरिचयं एवं ददाति। यथा –

अहं हि विश्वकर्मा वै दानवानां महाकविः।
सोऽहं वै त्वत्कृते कर्तुं किंचिदिदामि पाण्डवः।।[78]

तेन धर्मात्मा युधिष्ठिराय सभागारं निर्माणं कृतम्। यथा –

सकालं कंचिदाश्वस्य विश्वकर्मा विचिन्त्य तु।
सभां प्रचक्रमे कर्तुं पाण्डवानां महत्मनाम्।।[79]

महाभारतानुसारेण स्थापत्यवेदस्याधिकाक्षेत्राणि यथा अर्जुनकृष्णाग्रे मयदानवेन वर्णितम्। यथा –

दानवानां पुरा पार्थ प्रासादा हि मया कृतः।
रम्याणि सुखगर्भाणि भोगाढयानि सहस्रशः।।
उद्यानानि च रम्याणि सरांसि विविधानि च।
विचित्राणि च शास्त्राणि स्थाः कामगमनास्तथा।।
नगराणि विशालानि साट्ठप्राकारतोरणैः।
वाहनानि च मुख्यानि विचित्राणि सहस्रशः।।
बिलानि रमणीयानि सुखयुक्तानि वै भृशम्।
एतत् कृतं मया सर्वं तस्मादिच्छामि फाल्गुनः[80]

एवं दानवराजानुसारेण विशालप्रसादाः–रमणीयानि उद्यानानि –सराः– विचित्राणि अस्त्रशास्त्राणि–इच्छानुसारेणचालितरथाः साट्आलिक प्राकार तोरणयुक्तानिविशालानिनगराणि सहस्राणि, विचित्राणि वाहनानि, रमणीयानि सुखयुक्तानि बिलानि च स्थापत्यायुर्वेदे वर्णितानि।

**विश्वकर्माभाषितग्रन्थानां परिचयः –**

**अपराजितपृच्छा –**

अपराजितपृच्छा विश्वकर्मः स्वस्य चत्वारमानसपुत्रेभ्यः जय–विजय – सिद्धार्थः अपराजितेभ्यः कथितम्।

**विश्वकर्माशास्त्रम् –**

प्रकाश–दीपार्णव–क्षीरार्णव–वास्तुविद्या–विश्वकर्मशिल्प–वास्तुसमुच्चय – वास्तुविधि–वास्तुप्रकाश
आयतत्व–विश्वकर्मसंहिता–विश्वकर्मीयशिल्प– विश्वकर्ममत –विश्वकर्मज्ञानादिग्रन्थानां प्रणयनं विश्वकर्मणा कृतम्।

विश्वकर्मणः ग्रन्थेषु हस्तलक्षण–हस्तमान–सूत्रधार–परीक्षा–शल्योद्धार शल्यशोधन–प्रासादनिर्माण–मार्गपरीक्षा–प्रतोली–खेट–नगर– कूप– पूर–सभा–राजभवन–अश्वशाला–गजशाला– आयतत्व– जगति –तोरणाधिकार– पीठलक्षण–मण्डोवरविधान–द्वारमानं–मण्डप–संवरण– प्रतिमालक्षण –वास्तोत्पत्ति–वास्तुपुरुष–सूत्रपात–शिलान्यास–वास्तुपूजन –देवतान्यासविधि संवरणाधिकार–शिखरलक्षणादिनां विषयानां सम्पूर्ण– वास्तुविवरणम् कृतम्।

**भोजराजस्य समराङ्गणसूत्रधारः –**

धारानरेशः परमारवंप्रदीपभोजराजेन 93 अध्यायेषु अष्टसहस्रश्लोकेषु अस्य ग्रन्थस्य प्रणयनं कृतम्।

तत्र वास्तुपुरुष–पुरनिवेश–द्वारकर्म–मार्गकर्म–देवभवन विमानादि निर्माण–राजवेश्म–वर्णाश्रमानुसारेण आवासव्यवसायञ्च–वेदीनिर्माण–शिविर –निवेशादि विस्तृतफलकेन वास्तसिद्धान्तानां वर्णनं कृतम्।

**सूत्रधारमण्डनस्य ग्रन्थाः –**

मेवाड़स्य राणाकुम्भा तस्य राज्याश्रये सूत्रधारेण मण्डनेनाकेनग्रन्थाः प्रणीताः।'उत्तरभारते–गुजराते–राजस्थाने

सर्वसूत्रधारा मण्डनस्यैव सिद्धान्तानां स्वस्य निर्माणस्याधाररेखा मन्यते। मण्डनपरम्परायाः अनुकरणं कृत्वा ये आत्मगौरवस्य अनुभवं कुर्वन्ति। वास्तुविज्ञाने कदाचिदैव कोऽपि विषयं तं विषयं सूत्रधारो मण्डनो न स्पर्शयति।[81]

**1.राजवल्लभवास्तुशास्त्रम् – वा. राजवल्लभमण्डनम् –**

सूत्रधारेण मण्डनेन भूपतिवल्लभः इति नाम दत्तः। ग्रन्थे 14 अध्यायेषु 1497 श्लोकाः सन्ति।

**2.वास्तुमण्डनम् –**

सः मण्डनस्य महत्वपूर्णग्रन्थोऽस्ति। तत्र तिथि–मुहूर्त–मास–शकुन–अयन–संवत्सर–योग–बल–ग्रहाचार–राजप्रसाद–निर्माण–आरामवाटिका– जलाशय–वापी–कूप–तड़ागादि अनेकविषयाणां विवेचनं कृतम्। ग्रन्थे असिमन् 843 श्लोकाः सन्ति। अयं ग्रन्थः अष्टाध्यायेषु विभाजितः।

**3.आयातत्वम् –**

गृहनिर्माणे विचारणीयाः विषयाः अस्मिन् ग्रन्थे वर्णिताः सन्ति।

**4.वास्तुसारमण्डनम् –** स्वस्य मतः पूर्वसूरि अनुसारेण वर्णितम्।

**5.देवतामूर्तिप्रकरणम् –**

**6.रूपमण्डनम् –**

देवतामूर्तिप्रकरणस्य परिशिष्टरूपेण अस्ति।

**7.प्रासादमण्डनम् –**

अष्टाध्यायेषु 435 श्लोकाः अस्मिन् ग्रन्थे सन्ति। ग्रन्थस्य रचनायां मुख्याधारेण भुवनदेवाचार्यकृताः 'अपराजितपृच्छा' नाम्नः ग्रन्थस्याधारेण दृश्यते।

**दानवराजरामयस्य ग्रन्थाः –**

सूत्रधारनाथा कृत वास्तुमञ्जरी सूत्रधारवीरपालकृत प्रासादतिलादिञ्च ग्रन्थानामुल्लेखनीयमस्ति। मुनिमयस्य प्रमुखग्रन्थाः–मयमतम्–मयमतम्– शास्त्रम् –मयसंग्रहः –मयदीपिका इत्यादयाः सन्ति।

**1.मयमतम् –**

अस्मिन्ग्रन्थे मयेन सम्पूर्णवास्तु च सर्वशिल्पसिद्धान्तानां सम्यक्रूपेण सर्वाङ्गीणरूपेण विवेचनं कृतम् अस्ति। ग्रन्थे अस्मिन् 36 अध्यायाः तथा च 3325 श्लोकाः सन्ति। अस्मिन् ग्रन्थे भूपरीक्षा–भूपरिग्रह–मानोपकरण– वास्तुप्रकार बलिकर्म–ग्रामविन्यास–नगरविधान–गर्भविधान–प्रस्तरकरण– उपपीठविधान–सन्धिकर्म–शिखर–प्रतिमा–लि›लक्षण–शयनसिंहासना – धिकार–चतुर्गृहविधान–त्रिभूमि–गृहप्रवेशादि इत्यादि विषयाणां विशद् विवेचनमस्ति।

**2.मयमतम् –**

अस्मिन् ग्रन्थे चत्वारः अध्यायः सन्ति। तत्र प्रतिमालक्षणं–मान–न्यूनाधिकप्रमाणात्भवितुम प्रतिमाया फलाफमादीनि विषयानि वर्णितानि सन्ति। अन्यदक्षिणेषु वा द्वापिदग्रन्थेषु मानसार–काश्यप–शिल्पम–मनुष्यालयचन्द्रिका–अगसत्यकृतशिल्पशास्त्र ईशान शिवगुरुदेव– पद्धति इत्यादयः ग्रन्थाः प्रचलिता सन्ति।

**काश्यपशिल्पम् –**

मूलतः काश्यपशिल्पं आगमशैल्यानुसारेण अस्ति। तस्यापरं नाम ‘अंशुमन्देदागम’ अपि अस्ति। ग्रन्थे सर्वाङ्गीणवास्तुवर्णनमस्ति। ग्रन्थस्यप्रणयन –कर्ता महर्षिकाश्यपो अस्ति। ग्रन्थस्य मूलकर्ता भगवानमहादेवः तथा च महर्षिकश्यपः तस्य ग्रन्थस्य विस्तारकः अस्ति।

**मानसारः**

इयं द्राविडवास्तुग्रन्थस्य कर्ता मानसारमुनिः अस्ति। ग्रन्थस्य कथनानुसारेण गङ्गाधरशिवात् प्रारभ्य कमलोदभवब्रह्मा –कमलनयनविष्णु इन्द्र–बृहस्पति–नारदाभिः महर्षिभिः रचितान् ग्रन्थान् मानसारेण विस्तारितः। यथा –

गङ्गाशिरः कमलभूकमलेक्षणेन्द्रगीर्वाणानारदमुखरखिलैमुनीन्द्रैः।

प्रोक्तं समस्ततरवस्त्वपि वास्तुश्षास्त्रं तन्मानसारऋषीणामपि लक्ष्यते स्म।[82]

सप्तप्रकरणेषु विभक्तेऽस्मिन् ग्रन्थे वास्तुप्रकरण– भूपरीक्षा–भूसंग्रह–शंखस्थापन–पदवन्यिास–बलिकर्मविधि– ग्रामादीनां लक्षणं–गर्भन्यास–भूमिलम्बविधान–विद्वानलक्षण–द्वादशशतकानांविधान–गोपुर – मण्डपशाला–शयन–गृहप्रवेश–बौद्ध–जैनमुनि–लक्षणं–यान–भूपतिः–कल्प –वृक्षादीनां लक्षणानां विद्यमानां वर्णनम् ग्रन्थे अस्ति।

**सकलाधिकारः –**

महर्षि अगस्त्यकृत अस्मिन् ग्रन्थे प्रधानतया चित्रकलायाः मर्तिकलायाः विवरणं प्राप्नोति। सकल–निष्कल मिश्रविभागत्रयेषु मूर्तिनिर्माण विधिः, भगवानशिवकथितायाः अगस्त्येन उपदेशितास्त। तत्र भगवान शिवस्य मूर्तिनां षोडशभेदाः प्रकल्पिता।

**तन्त्रसमुच्चय –**

नारायण नम्बूदिरी कृत ग्रन्थे तन्त्रविषयेभ्यः सह प्रासादस्थापत्यस्य वर्णनं प्राप्नोति। महामहोपाध्याय टी. गणपतिशास्त्रिणा अनन्तशयनग्रन्थावल्यां प्रकशितः कृतः। महामाहोपाध्यायानुसारेण ग्रन्थः 'देवप्रतिष्ठा पूजोत्वसादि विधिनां सारसंग्रहात्मा ग्रन्थः अस्ति[83] –

मनुष्यालचन्द्रिका, देवालयचन्द्रिका ग्रन्थ द्वयस्य कर्ता नम्बूदरी प. नीलकंठमस्ति।

**मानववास्तुलक्षणम् –**

इयं ग्रन्थोऽपि नारायणनम्बूदिरीकृत लघुकायो ग्रन्थोऽस्ति। ग्रन्थस्य प्रकाशने मानसारस्य खण्डत्रयं परिशिष्ट 'ग' मध्ये दत्तम्। 64 श्लोकाः प्रचलितास्ति। मनुष्यलयचन्द्रिका सदृशः अत्रापि मानवीयानां नियमाः वर्णिताः सन्ति।

एवमेव स्थापत्यवेदस्य प्रकाशिता अनेकानां ग्रन्थानां प्रणयनं आचार्यः ऋषयश्च कृतम्। इतोऽपि बहवाः ग्रन्थाः सन्ति। वास्तुविज्ञानस्य सिद्धान्तानां विवरणञ्च विवेचनं कुवन्ति किन्तु अत्र वास्तुशास्त्रस्य प्रचलितानां मुख्यग्रन्थानां संक्षिप्तेन परिचयं प्रदत्तम् इति।

**गान्धर्ववेदः ––**

संस्कृतसाहित्ये चत्वाराः वेदाः प्रसिद्धाः सन्ति। तत्र प्रतिवेदानां उपवेदः भवति। सामवेदस्य उपवेदः गान्धर्ववेदः अस्ति। सम्प्रति गान्धर्ववेदस्य मौलिकरूपं नोपलभ्यते। यत्र–तत्र सामब्राह्मणग्रन्थेषु अस्मिनविषये किञ्चित वर्णनं उपलभ्यते। गान्धर्ववेदे सङ्गीतस्य विवेचनमस्ति। सङ्गीतविद्यायाः निरूपणको गान्धर्ववेदे अस्ति।

अस्मिन् उपवेदे सप्तस्वराः प्रसिद्धाः सन्ति। तद्यथा – सप्तस्वराणादीनां षड्ज–ऋषभ–गान्धार–मध्यम–पञ्चम–धैवत–निषादीनां रागरागणीनां परमं प्रयोजनं देवाराधनादिकं निर्विकल्पमाध्यम सिद्धिद्वार आराधनम्। किन्तु कालान्तरं नारदशिक्षा–सङ्गीतरत्नाकर, सङ्गीतमकरन्द – इत्यादिग्रन्थाः प्रसिद्धाः जाता। यद्यपि सङ्गीतशास्त्रस्य साहित्यं विपुलमस्ति। अस्य तन्त्रस्य आदिशंकराचार्यः नाट्याचार्यः भरतमुनिरेव। तेनोक्तं यथा ––

पञ्चाशीत्याधिकं ह्येतद् गीता›ानां शतं स्मृतम्।

स्वयमेवपुराप्रोक्तं भरतेन श्रुतेः परम्।।

पुराणेष्वपि गानविज्ञानकुशला महर्षयः देवर्षयः गान्धर्वः, किन्नराश्च सुप्रयन्तेतराम् गानविद्याधारा।

''गान्धर्वाः ललितं जगुरिति विश्रुतमेव लोके।'' अस्य स›ीतशास्त्रस्योद्भवः गान्धर्ववेदा› गन्धर्ववेदविदो ब्रह्मणः सकाशात भारतीसरस्वतीं जग्राह। ततः नारदः तस्माच्य भरतमुनिः मुनेः सकाशाचान्ये सङ्गीताचार्याः इत्यमेव अवतरणक्रमः प्रसिद्धः। इदं स›ीत रागमयं भवति। तेषु रागाः चतष्टाधिकाः शतद्वयसंख्यका सन्ति इति। शार्›देवेन स्वसंगीतरत्नाकरे निगदितम्। गाधर्ववेदोऽयं सामगानस्य व्यवस्थापको ग्रन्थोऽस्ति।

गान्धर्ववेदस्येदम् अण् –गान्धर्वः ( गन्ध्+अर्व+अच् ᅳ गन्धर्वः ) गान्धर्वशब्दस्यार्थः गायकः। स›ीतविद्याश्च व्यवस्थापको ग्रन्थः। तमेतं सामवेदोपवेदं गान्धर्व नाम उपजीव्यैव स›ीतशास्त्रस्य प्रवृत्तिः इति फलितोऽर्थः ।

गान्धर्ववेदे चतुर्दशप्रकराणानि सन्ति। तत्र –

प्रथम–द्वितीयप्रकरणयोः क्रमशः ध्वनि–वर्णादिनामुत्पत्तिः प्रकार–भेदादीनां वर्णनमस्ति। तृतीयप्रकरणे स्वराणां भेदाः रागरागादीनां सप्तस्वराणां , ताल, लयादीनां वर्णनमस्ति। स्वराश्च षडजाड्यं, सप्त स्वरमूलं तु सङ्गीतम्।

सङ्गीताचार्यैः प्राह –

गीतं वाद्यं च नृत्यश्च त्रयं स›ीतमुच्यते।

गीतं वाद्यं नर्तनञ्च इति त्रयमपि सम्भूय स›ीतपदेन परिभाष्यते।

तत्र नर्तनं वाद्याानुङ्गामि, पुनर्गीतनुगामि भवति।

परं प्राधान्यं तु गीतस्य। अनेन कारणेन गीतमेव अंगीकृतम् आचार्यैः यथा–

नृत्यं वाद्याानुगं प्रोक्तं वाद्यं गीतानुवृत्ति च।
अतोगीतं प्राधानत्वादादिदावुभवर्ण्यते।। [84]

तदिदं संङ्गीतं स्वरमूलम्। स्वराणां वर्णनं गान्धर्ववेदस्य तृतीयप्रकरणे निहितम्। एतेषां स्वराणां वर्णनं पाणिनीयशिक्षायामपि मध्ये अस्ति।

उदात्तो निपाद् गान्धर्वरावनुदान ऋषभधैवतौ।
स्वरितप्रभवा क्षेत्रे षट्ज मध्यमपञ्चमाः।। [85]

अत्र सप्तस्वराः संगीततन्त्रे षट्ज ऋषभं, गान्धार–मध्यम–पञ्चम–धैवत–निषादाश्वेति संज्ञायां सङ्गीयन्ते।

एतेषां स्वराणां ध्वनि–स्वराणां ध्वनि–साजात्यं, पशु–पक्षिणां अवबुध्य स›ीततत्वविधि उपस्थापितम्।

उक्तं च नारदीयशिक्षायाम् ––

षड्ज मयूरो वदति गावो रम्भन्ति चर्षभम्।
अजविकेषु गान्धारं क्रौच्चो वदति मध्यमम्।।
पुष्यसाधारणे काले कोकिले वदति पञ्चममे।
अश्वस्तु धेवतं वक्तिं निषादं वाप्ति कुञ्जरे ।। [86]

एतेषां स्वराणां वर्णनं गान्धर्ववेद निहितमस्ति। सर्वप्रथमं तु गान्धर्ववेदस्य रचना नारदेन कृता । तद्यथा –

गान्धर्वो नारदो वेदाः, भारद्वाजो धनुग्राह्य। [87]

नारदऋषेः पश्चाद् नाट्यचार्यः भरतमुनिरेवास्य स›ीततन्त्रस्यापि आदिमाचार्यः इत्येवानुश्रूयते। तथापि भरतोयज्ञता तु ज्ञनशास्त्रस्य न अ›ीकर्तुं शक्यते। यथा तत्वपुराणमयि श्रुतयो ज्ञान–विज्ञानयो कुशलः महर्षयोः वर्षयश्च गान्धर्वा किन्नराश्च नितरां सुप्रथेन्तराम् गानविद्याधराः।

भवगतः शंकरस्य नाम को न जानति ? डमरूध्वनि अनुन्धि ताण्डवनृत्यपरुस्सरं किमपि तद हद्याहलादि सङ्गीतम्। देवर्षिनारदस्य नाम को न श्रृणोत्यद्यापि वल्कलीं नाम्नीं विपञ्चीं सारांगः पञ्चमं रागमुण्ड्चन्तिम्।

"गन्धर्वाः ललितं जगुः।"

इति विश्रुतमेव लोके । इत्येषु बहवः सङ्गीतशास्त्रस्य प्रणेतारोऽपि सम्भवेयुरत्यर्य न शड.कावकाशः तं च ग्रन्थाः लोपं जाता। तेषु सङ्गीतरत्नाकरं, सङ्गीतनकाविधिः प्रभीतीनां नामानि यत्र–तत्र समुपलभ्यते अद्यापि।

तदिदं सङ्गीतशास्त्रं गान्धर्ववेदोऽपि ब्रह्मणः सकाशात् भगवती सरस्वती जग्राह, सरस्वत्याः नारदः, नारदः भरतमुनिः –

पञ्चाशीत्याधिकं ह्येतेद गीता›ानां शतं स्मृतम्।
स्वमेव पुरा प्रोक्तं भरतेन श्रुतेः परम्।।

भरतमुनि सकाशात् अन्ये स›ीताचार्याः इति अवतरणक्रमः। सक्रीतशास्त्रस्य प्रस्थान वेदाश्चसंस्थापकाः। प्रपञ्च प्रसरः तेषु स›ीताकारेषु कृतः अवलोक्यते। यद्यापि बहवो ग्रन्थाः अनुपलब्धाः तथापि इदानीं ये उपलभ्यन्ते तेषां नामानि ईदृशी वर्तन्ते ––

| | **ग्रन्थनाम** | **ग्रन्थकर्ता** |
|---|---|---|
| 1. | रागतत्वबोधः | श्रीनिवासः |
| 2. | राजतर›िणी | श्री पण्डितलोचनः |
| 3. | रामनिरूपणम् | महर्षिनारदः |
| 4. | रागमञ्जरी | पुण्डलीविट्ठलः |
| 5. | रागलक्षणम् | रागकविः |
| 6. | रागविबोधः | कवि सोमनाथः |
| 7. | रागमाला | पुण्डली विट्ठल |
| 8. | सङ्गीतरत्नाकर | श्री सार्ङ्गदेवः |
| 9. | तमकरन्दः | महर्षिनारदः |

**10.** सङ्गीत–पारिजातः अहोबकः

एतेषु ग्रन्थेषु सङ्गीतपरम्परायाः प्रयोगक्रमः गान्धर्ववेदानुसारतः एव वर्णितः। इदं तु ध्येयं यत् सङ्गीतकानि यद्यपि छन्दोनिबद्धानि भवति न तु गद्यरूपाणि। येन केनापि छन्दसा गुम्फितानि तानि सकलैरेव रागैर्गयानि भवन्ति।

अस्मिन् प्रकरणे मया पूर्वमेव षड्जादीनां चर्चा कृता। ते सप्तस्वराः पुर्नरपि वादी–संवादी–अनुवादी–विवादिति भेदात् चर्तुधा भिद्यन्ते। एतेषां स्वराणां सांगोपा› वर्णनं गान्धर्ववेदे विद्यते। इदमपि अवबोध्यम्। यत् सप्तस्वराणां उच्चारणे प्रत्येकं यः समयोः अवधारितः तस्यैव सूक्ष्मतान्तरावन्त भेदः श्रुतिरित्युिच्यते। आभिनेव श्रुतिभिः स्वराः तीव्रकोमलानि कोमलभावं ब्रजन्तः रागरागीणीनां सत्यस्वरूपं व्यक्तिकर्तुं प्रभवन्ति।

**वाद्यादि स्वराणां परिचयः –**

**वादी –**

रागस्वरूपप्रद्योतकः प्रमुखो स्वरोः। ''वादी'' इति परिभाष्यते । यथा – स – रे – ग – म – प – ध – नी ।

**संवादी –**

वयोः स्वरयोः समश्रुतिः तौ मिथः संवादिनौ भवतः। यथा – यम घनी सस रेग इत्यादयाः।

**विवादी –**

ययोश्च पुनः स्वरयोः श्रुतिसंख्यासंसथानक्रमाः एकान्तरं भवति तौ मिथः विवादिनौ भवतः। यथा गारेनीध।

**अनुवादी –**

संवादिविवादिभ्यो व्यतिरिक्ताः ये स्वराः सन्ति ते अनुवादिनः भवन्ति। यथा रेग– नेग – धन – सम –पनी सम –पद्य य – ध रे – ध– प – ध – नी – रग –घनी – रागमय – सरमय।

अतः स्व–स्वरूपकप्रतिपत्यर्थं श्रुतिः (वेदः) ज्ञानमपरिहार्य स›ीततत्वमिदं एवं प्रवरमित। तञ्च संगीत रागमयं भवति। ते राजाचतुषष्ट्याधिकाः शतद्वयसंख्यकाः भवन्ति। शारंगदेवेन स्वग्रन्थे स›ीतरत्नाकरे उक्तम् ––

'' रागाणाञ्च शतद्वयी चतुषष्ट्यधिकं श्रूतेशांगी श्री कराग्रणी इति।

रज्जवयतीमानि मनांसि इतिराज्ञा एते राजा सामायिकाः भवन्ति। समयानुसारेण गीयमाना एव रञ्जका भवन्ति इति। उक्तं च –

यथाकाले समारब्धं गानं भवति रञ्जकम्।

प्रथम प्रहारादारभ्य अष्टमप्रहरप्रयन्तं प्रतिप्रहरं गीयमाना द्विशताधिकाः रागाः अद्यापि समुपल्लासित। तेषां रागाणां वर्णनं ईदृशमस्ति।

| प्रहरनाम | रसमान |
|---|---|
| 1. प्रथम प्रहरे गीयमानं रागाः | शान्तरसमुदभावयति। |
| 2. द्वितीयो प्रहरे गीयमानं रागाः | करुणरसमुदभावयति। |
| 3. तृतीये प्रहरे गीयमानं रागाः | रौद्ररसमुदभावयति। |
| 4. चतुर्थे प्रहरे गीयमानं रागाः | श्रृंगाररसमुदभावयति। |
| 5. रात्रौ प्रथमप्रहरे गीयमानं रागाः | श्रृंगाररसमुदभावयति। |
| 6. रात्रौ द्वितीयेप्रहरे गीयमानं रागाः | वीररसमुदभावयति। |
| 7. रात्रौ तृतीयप्रहरे गीयमानं रागाः | करुणरसमुदभावयति। |
| 8. रात्रौ चतुर्थप्रहरे गीयमानंरागाः रागाःशान्तरसमुदभावयति। | |

तेषु रसेसु च शान्त समाहलादकरो वीररसः समुत्तेजकः, श्रृगारः प्रेमभावोद्भावकःभवति। किन्तु तेषु रसेसु प्रमुखरसास्तु षडेव षड्त्रिंशतसंख्याकाश्च रागिन्यः भवन्ति।

लौकिकसंस्कृतसाहित्ये गीतिचर्चित रचना प्रणाल्याः सर्वप्रथमप्रवर्तकः श्रीजयदेवः अस्ति। राधाकृष्णयोः केलिकथा रसस्यानुभवः अभिसारलीला च गीतगोविन्दे प्रकृष्टेन सरसभाषायां समुपलभ्यते। किन्तु विस्तारिभिः अत्र न प्रस्तूयन्ते तेषां गीतानि।

अनेन प्रकारेण सुनिश्चितमिति यत् स›ीशास्त्रस्य अवतरणम् उपवेद गान्धर्ववदादेव अभवत्।

दैत्यगुरुशुक्राचार्येण गान्धर्ववेदस्य लक्षणं ईदृशं कथितम्। यथ –

स्वरैरुत्तादा धर्मैस्तंन्त्रीकण्ठोर्त्थितैः सदा ।
सताकैगानविज्ञानं गान्धर्वो वेद एव सः।। [88]

वं सामवेदं एव उपवेदः, गानधर्ववेदः संगीतविद्यायाः व्यवस्थापको ग्रन्थः वर्तते। अत्र रागरागादीनां सप्तस्वराः ताल–लयादीनां परिचयको सम्प्रति गान्धर्ववेदे प्रायशः लुप्तप्रायः वर्तते। तत्र गीत–नृत्य–वाद्यादि भेदन बहुप्रस्थानस्य अस्य वेदस्य देवता आराधनाादि सिद्धिं च अस्य मुख्यप्रयोजनमस्ति।

# सन्दर्भ–सूची

## 1.उपवेदानां महत्वम्


1. शुक्रनीतिसारे – 4/3/27
2. महाभारते–शान्तिपर्वे–210/21
3. महर्षिचरक–चरकसंहिता–1/43
4. शुक्रनीतिसारे–4/3/37
5. चरणव्यूहे–1/45
6. चरकसंहितायाः – 30/21
7. सुश्रुतसंहितायाः – 1/6
8. अष्टा›हृदये – आचार्य वाग्भट
9. ब्रह्मवैवर्तपुराणे – 1/16/10
10. काश्यपसंहिता–विमानस्थाने–महर्षि काश्यप – 1/10
11. शुक्रनीतिसारे – 4/3/37
12. काश्यपसंहितायाः विमानस्थाने – 1/10
13. महर्षि सुश्रुत–10
14. अष्टांग–सूत्रस्थाने – 1/2
15. चरकसंहिता – 1/42
16. चरकसंहिता – 3/41
17. सुश्रुतसंहिता – 1/6
18. विघ्नभूता यदा रोगाः प्रादुर्भूताः शरीरिणाम्।
    तपोपवासाध्ययनब्रह्मचर्य व्रतायुषाम्।।
    तदा भूतेष्वनुकोशं पुरस्कृत्य महर्षयः।
    समेता पुण्यकर्मणा पार्श्वे हिमवतः शुभेः।।
    चरकसंहिता–1/6–7
19. चररसंहिता – 1/8 तः 13

20. अहमर्ये वियुज्येऽयमत्रेति प्रथमं वचः।
भारद्वाजोऽब्रवीतस्मादृषिभिः स नियोजितः।। चरक.–1/19

21. स शक्रभवनं गत्वा सुरर्षिगणध्यगम्।
प्रोवाच भगवान् धीमानृषीणां वाक्यमुत्तमम्।।
चरकसंहिता–1/2/21

22. तस्मै प्रोवाच भगवानायुर्वेदं शतक्रतुः।
यदैरल्यैर्भातिं बुद्धया विपुकांपरमर्षयो।।
हेतुलि›ौषधज्ञानं स्वस्थातुरपरायणम्।
त्रिसूत्रं शाश्वतं पुण्यं बुबुद्धे च पितामहः।।
चरकसंहिता –1/23–24

23. ऋषयश्च भरद्वाज्जगृहुस्तं प्रजाहितम्।
दीर्घमायुश्चिकीर्षन्तो वेदं वर्धनमायुषः।।
चरकसंहिता–1/27

24. आयुर्वेद का प्रामाणिक इतिहास–पृ.–159

25. चरकसंहिता / चिकित्सास्थाने–1/1/6

26. सुश्रुतसंहिता– 1/3–4

27. सुश्रुतसंहिता – 1/6

28. ब्रह्मा प्रोवाच ततः प्रजापतिरधिजग्रे, तस्मादश्विनौ अश्विन्भ्यामिन्द्रः, इन्द्रादहं मयात्विहु प्रदेयर्भिभ्य प्रजाहितहेतोः।।
सुश्रुतसंहिता–1/20

29. काश्यपसंहिता

30. अष्टा›हृदये – 1/3/4

31. अष्टा›संगहे – 1/6 – 13

32. ब्रह्मवैवर्तपुराणे

33. हरितसंहिता–महर्षि हारितः –1/5

34. काश्यपसंहिता–1/1

35. सुश्रुतसंहिता–सुश्रुत–1/7

36. अष्टा›हृदये/सूत्रस्थाने–आ. वाग्भट – 1/5

37. सुश्रुतसंहिता
38. महर्षि हारितः
39. महर्षिसुश्रुतः
40. सुश्रुतसंहिता–1/23
41. हारितसंहितायाः–2/15
42. सुश्रुतसंहितायाः –1/1/7
43. हारितसंहितायाः –2/9–12
44. सुश्रुतसंहितायाः – 1/4
45. हरितसंहितायाः –2/11
46. सुश्रुतसंहितायाः – 1/5
47. हरितसंहिता –2/17
48. सुश्रुतसंहिता – 1/6
49. हारितसंहिता – 2/16
50. सुश्रुतसंहिता
51. सुश्रुतसंहिता – 1/7
52. हारितसंहिता – 2/21–22
53. सुश्रुतसंहिता – 1/8
54. हारितसंहिता –2/20
55. चरकसंहिता – प्रस्तावना पृ.–10
56. भेलसंहिता प्रथमसंस्करण
57. चरकसंहितायाम् – 1/21
58. हरितसंहिता – 1/13–14
59. नत्वां शिवं परमतत्वकलाविरुद्धं ज्ञानामृतैः –हारितसंहिता–11
60. हारतिसंहिता – 1/2–5
61. भैषज्य कल्पना – पृ.–53
62. शार्ङ्गधरसंहिता, प्रस्तावना–पृ.–4
63. शुक्रनीतिसारे –4/3/58
64. मयमते – 2/3

65. उणादि कोाः 1/70
66. मानसारे
67. मयमतम्
68. मयमतेग्रन्थे – 2/21
69. मयमते – 2/3
70. विश्वकर्मा प्रकाश – 13/11/113
71. मत्स्युपराणे – सू.–1/2–4
72. मत्स्युपराणे – सू.–5/27–28
73. रामायणे – उ.काण्डे–12/3
74. रामायणे – उ.काण्डे–12/18
75. महाभारते–सभापर्वे
76. रामायणे – उ.काण्डे–12/8–9
77. महाभारते–सभापर्वे – 227/47
78. महाभारते–सभापर्वे – 234/6
79. महाभारते–सभापर्वे
80. महाभारते– 234/18
81. महाभारते–सभापर्वे – 234/7/8/9/10/11
82. सूत्रधार–प्रथमाध्याये – पृ.–24
83. मानसारे – 1/2
84. स›ीतरत्नाकरे – 1/24
85. पाणनीयशिक्षायां – 12
86. नारदशिक्षायां – 12
87. महाभारत – शान्तिपर्व – 212
88. शुक्रनीति – 4 /3/39

# 2.धनुर्वेदसंहितायाः परिचयः

धनुर्वेदसंहितायाः रचयिता च रचनाकालस्य विषये निश्चितरूपेण किमपि न वक्तुं शक्यते। ग्रन्थस्य प्राचीनतावश्यमेव निर्विवादितास्ति। ग्रन्थावसाने संहिता महर्षिवशिष्ठप्रणीता इति दर्शितम्।

अस्य ग्रन्थस्य वा संहितायाः प्रतिपादको महर्षिवशिष्ठः वैदिकऋषिः। सर्वेषु वैदिकग्रन्थेषु पुराणेषु धर्मशास्त्रेषु रामायणमहाभारतेतिहासेषु अन्येषु च संस्कृतवा›मये च महर्षिवशिष्ठस्य स्थानं महत्वपूर्णं दरीदृश्यते। किञ्च ऋषीषु वशिष्ठः भृगुश्च सर्वं श्रेष्ठत्वेन ज्ञायन्ते।

महर्षिणा वशिष्ठेन भारतीयज्ञानविज्ञानस्य प्रायः सर्वशाखायां सर्वशास्त्राणां स्वज्ञानराशिप्रभावेन स्वप्रतिभाबलेन संहिता निर्माणं वा ग्रन्थप्रणयनं कृतम्।

संस्कृत वाङ्मयेऽनेकानि शास्त्राणि सन्ति। शास्त्रनिर्माणस्येका विशिष्ट –वैज्ञानिकापद्धतिः आसीत्। तदनुसारेण महर्षिभिः अनेकभ्यः शास्त्रेभ्यः रचना कृता। यथा उपवेदविषयमाधारीकृत्य अनेकाः ग्रन्थाः पूर्वे आसन्। तेभ्यः केचित् लुप्ता आसन्। उपवेदेषु धनुर्वेदविषयेऽपि अग्निपुराणे च वशिष्ठसंहिता त्यक्वा बहवः ग्रन्थाः विलुप्ताः तथा च अमुद्रिताः सन्ति। तन्मध्ये ब्रह्मर्षिवशिठकृत धनुर्वेदसंहिता विचक्षणग्रन्थः अस्ति।

अयं ग्रन्थः अतीवप्राचीनं सर्वप्रथमं वशिष्ठधनुर्वेदसंहिता बङ्गालिमुद्रणतः ईश्वरचन्द्र शास्त्रिणः द्वारा सम्पादिता(1922) अस्य ग्रन्थस्य पूर्ववृत्तं

इदमस्ति यद् पी.सी. सदृशशताब्द्यां प्रकाशिताः सैवसमयः शिवाजी महाराजस्य (ए.डी. 1630 तः 1680 ) अस्य ग्रन्थस्य संस्कृत संस्करणं पश्चातजातम्।

महर्षिवशिष्ठकृत धनुर्वेदसंहितायाः जे.पी. पब्लिसिंग हाउस द्वारा प्रकाशिता अयमेव आधारः मया स्वीकृतः।

अस्मिन् समपूर्णे ग्रन्थे विभागत्रयमस्ति। यथा –

प्रथमभागे – 100 श्लोकाः।
द्वितीयभागे – 99 श्लोकाः।
तृतीयभागे – 66 श्लोकाः।

सर्वे मिलित्वा 265 श्लोका' अस्मिन् ग्रन्थे सन्ति।

अस्य ग्रन्थस्य आङ्गलभाषायां व्याख्या श्री पूर्णिमारॉय इत्यनया कृता इति। ग्रन्थस्य हिन्दीभाषायां अनुवादः अपि च विवेचनं सम्प्रति न उपलभ्यते।

प्राचीनकालस्य युद्धे धनुः प्रयोगः भवति स्म। किन्तु कतिपयप्रकारानि धनुमपि सन्ति च तेषां विवेचनं प्रयोगस्य अस्य मुख्यायोगः चापादीनां वैविध्यं युद्धे कानि–कानि वस्तूनि आवश्यकानि भवति इत्येषां विवेचनमस्ति।

महर्षिवशिष्ठस्य संहितायाः प्रारम्भो गद्यपद्यात्मकोऽस्ति। समपूर्णग्रन्थस्य शैली सरला गद्य–पद्यात्मिका च ग्रन्थेऽस्मिन् धनुर्विद्यायाः अस्त्रशस्त्राणां च युद्धस्य क्रमबद्धरूपेण वर्णनमस्ति। विषयप्रर्वतनं सरलारीत्या चान्यप्रचीनग्रन्थवदस्ति।

प्रश्नोत्तररूपो ग्रन्थः विश्वामित्रस्य वशिष्ठस्य च तन्मध्ये भवित् संवादे भगवान् महादेवस्य च भागर्वस्य परशुरामस्य संवादरूपेण ग्रन्थः इयमस्ति।

वशिष्ठसंहितानुसारेण धनुर्वेदस्य परमपरा द्वयमस्ति–

1.मूलपरमपरायां भगवताशिवेन धनुर्वेदः भार्गवाय परशुरामाय वशिष्ठाय च परशुरामेण ष्दत्तः।

2.अपरमेकं परम्परायां महर्षिणा वशिष्ठेन परशुरामप्राप्तो धनुर्वेदः राजर्षे विश्वमित्राय दत्तः। महर्षिवशिष्ठेन धनुर्वेदो चतुष्पाद इति कथितः। यथा –

1. प्रथमेपादे – दीक्षाप्रकारः
2. द्वितीयेपादे – संग्रहः
3. तृतीयेपादे – सिद्धप्रयोगाः
4. चतुर्थपाद – प्रयोगविद्या[1]

अस्य ग्रन्थस्याध्ययने स्पष्टं भवति गुरोः अधिकारावमस्ति। विना गुरुणा धनुर्वेदस्य ज्ञानं न शक्यते। विद्यायाः आद्यप्रवक्ता प्रणेता च भगवान शिवः अन्यञ्च परशुरामो वशिष्ठः क्रमेण अवतारश्च ब्रह्मर्षि स्तः। येन सूचयति यत् विद्ययाः प्राप्ताय अत्युच्चाध्यायात्मिकतावश्यकम् भवतीति। धनुर्वेदे कस्याधिकारं अस्यप्रश्नस्योत्तरे महर्षिवशिष्ठः धनुर्वेदे गुरुः ब्राह्मणः भवति च वर्गद्वयं इत्युक्ते ब्राह्मणक्षत्रिययोः द्वयोः युद्धाधिकारः ददाति। अन्यञ्च स्वार्थप्रयोजनाय शूद्रेणापि धनुर्वेदं ग्रहणीयम्।[2]

वशिष्ठानुसारेण धनुः –चक्र–कुन्त–खड्ग–छुरिका–गदा बाहुन्येतानि सप्तप्रकाराणि शस्त्राणि सन्ति। तेनाधारेण युद्धाचार्याणां वर्गीकरणं कृतम्। यथा –आचार्यः सप्तयुद्धः कथ्यते।[3] तेनाधारेण आचार्यः सप्तप्रकारणाणाम– स्त्रीणां ज्ञाता सप्तप्रकारेषु युद्धेषु प्रवीणः च भवति।

भागर्वः इत्युक्ते कोऽपि चतुरप्रकाराणां शस्त्राणां प्रवीणः च भवति।

युद्ध शास्त्रद्वयस्य ज्ञाता। शस्त्रद्वस्य युद्धेषु प्रवीणः च अन्ततोगत्वा गणकः एकेन शस्त्रेण बोधितः।[4]

**धनुर्वेदस्य प्रयोजनम् –**

ग्रन्थारम्भे पञ्चमेश्लोके च महर्षिणा वशिष्ठेन धनुवेर्दस्य प्रयोजनं वर्णितमस्ति। यथा –

वाच्मिते हिताय, स्वस्य रक्षणाय।
गौ–ब्राह्मण–साधु–वेद संरक्षणाय
दुष्टदस्युचोरादिभ्यः साधुसज्जनानां रक्षणाय
धर्मात् प्रजाप्रालनाय

इत्यादि इतोऽपि युद्धशास्त्रस्य प्रयोजनानि वर्णितानि।

ग्रन्थानुसारेण धीमान्–दृढ़चेता (सुदृढबलमनोबलयुक्तं) क्षोत्रियादि (उच्चकुलस्य) गुणयुक्तशिष्य भवितुं अर्हति। अपि च धनुधुरंदस्य नगरे कीदृशः महत्वमस्ति। अस्य वर्णनं सिहस्योदाहरणेन कथ्यते। यथा–

एकोऽपि नगरे यत्र प्रसिद्धः स्याद्धानुर्धरः।
ततो यान्त्यरयो यत्र दूरान्मृगाः सिंहादिव।।[6]

धनुर्वेदे वर्णानुसारं शस्त्रस्य च वर्णस्य वर्गीरणं कृतं यथा – ब्राह्मणानां कृते धनुष्यम्, क्षत्रियानां कृते खड्गम् च वैश्यवर्गस्यो प्रयुज्य कृतमस्ति तथा शूद्राणाम् कृते – गदा इति वर्गीकरणं कृतम्।[7]

अन्यं च वशिष्ठानुसारेण सप्रकाराणां युद्धानां नामोल्लेखोऽपि ईदृशं अस्ति। यथा –

1. धनुराधारेण – धनयुद्धम्
2. कुन्ताधारेण – कुन्तयुद्धम्
3. खण्डगाधारेण – खएड्गयुद्धम्
4. छुरिकामाधृक – छुरिकायुद्धम्
5. चक्राधारेण – चक्रयुद्धम्
6. गदामाधारीकृत्य – गदायुद्धम्
7. बाहुभ्याम् – बाहुयद्धम्[8]

तत्र सप्तप्रकाराणां युद्धानामनुसारेण आचार्यो कति युद्धानां ज्ञाता अस्ति येनाधारेण आचार्यस्य वर्गकोटि नियतं कृतम्। यथा –

सप्रकाराणां युद्धानां ज्ञाता आचार्यः भवति।

चत्वारप्रकाराणां युद्धानां ज्ञाता भागर्वः इति कथ्यते। च द्वयोः प्रकारयोः युद्धयोः ज्ञाता योधः इति नामधेयम् अनेनेक प्रकारस्य युद्धस्य ज्ञाता योद्धां गणकः भवति।[9]

महर्षिवशिष्ठो धनुर्विद्यायाः शिक्षयाः आरम्भो कस्मिन्काले करणीयं तस्यापि विवरणं करोति यथा– हस्त–पुनर्वसु–पुष्य–रोहिणी–फाल्गुनी–उत्तराषाढ़ा नक्षत्रे तथा च तृतीया–पञ्चमी–सप्तमी–दशमी–द्वादशी–त्रयोदशीतिथ्यां तथा च रवि–शुक्र–गुरुत्रयवासरेषु शास्त्रविद्ययाः शिक्षणस्य प्रारम्भं करणीयम्।[10]

एवञ्च तस्मिन् शिवावसरे कुमारी–ब्राह्मणान् भोजनं तापसनर्चनं शिवभक्तयोगिनां पूजनं च दिक्षाकाले करणीयम् इति।

अन्यञ्च गुरोः पुजनं कृत्वा उपवासयुक्तो मृगचर्मं धारयित्वा विनयेन गुरुं धनुर्विद्यायै याचनां करणीयम्। एवं विस्तारेण महर्षिवशिष्ठेन दीक्षाविधिविवरणं कृतम्।[11]

फलहीनेन बाणेन पुष्पवेध फलयुक्तेन बाणेन मत्स्यवेध–बाणेन मांसवेध च इति वेधत्रयं वर्णयित्वा बाणपतनस्य दिशानुसारेण फलकथनमपि महर्षिणा कृतम।[12]

अभ्यासकाले प्रयुज्यधनुषः यौगिकं धनुः द्वितीयं युद्धचायं धनुः इति युद्धोभ्यासे द्विविधं धनूंषि वर्णितानि। धनुर्वर्णने महर्षिवशिष्ठो एका महत्वपूर्णा सूचना ददाति। यथा –

वरं प्राणाधिको धन्वी न तु प्राणाधिकं धनुः।
धनुषां पीड्यमानस्तु धन्वी लक्ष्यंन पश्यति।।[13]

महर्ष्यानुसारेण साधकाे महत्वपूर्णोऽस्ति। न तु साधनानि। प्राणाधिकप्रियो धनुर्धरैव न धनुः यदा स्वस्य क्षमतानुसारेण धनुः न भवति।

यदा अतिविशालं च अतिभारयुक्तं धनुः स्यात् तदा स्वस्य धनुषाः पीडितोधनुर्धरो स्वलक्ष्यं नश्यति च बाणक्षेपनञ्च स्वधनुर्भारवदयोः चिन्तायामुद्विग्नं भूत्वा विजयलाभा द्वज्वियति।[14]

**शुभाशुभलक्षणम् –**

महर्षिणा वशिष्ठेन स्वस्यग्रन्थे धनुर्विद्यायाः सा›ोपा›वर्णनं कृतम्। तत्र धनुः–नाप–पर्व–आकार–वर्णानामानुसारेण कौण्डनस्य शुभाशुभलक्षणानि चर्चितानि। तदनुसारेण – त्रिपर्व पञ्चपर्व, सप्तपर्व नवपर्वयुक्तचापं शुभकारकम्। अन्यञ्च महर्षे राज्ञानुसारेण चतुष्पर्वषट्पर्व–अष्टपर्वानि वर्जितानि सन्ति। धनुषि तत्र केषाञ्चितमते नववितस्तिमानयुक्तं धनुरपि शुभकारकमस्ति।[15] तथा च अजीर्ण –अपक्वं–ज्ञातिदृष्टं– दग्धं–छिद्रं– गुणहीनं गुणकान्तं–कर्तव्यं बाह्याभ्यन्तरहस्तकञ्च धनुः दोषसमन्विमस्ति।[16]

एवं विसतारेण महर्षिणा वशिष्ठेन वर्जितानां धनुषां लक्षणानि दत्तानि। पश्चात् तेन महर्षिणा कौदण्डनिर्माणाय लौह–चर्म–काष्ठ–रजतादीनां द्रव्यानां वर्णनं कृतम्।[17]

**धनुषः गुणलक्षणानि –**

'गुणानां लक्षणं वक्ष्ये'इत्युक्त्वा वशिष्ठो विश्वामित्राय प्रत्यञ्चा च तस्य निर्माणविधिं वर्णयति। प्रत्यञ्चानिर्माणप्रक्रियानन्तरं बाणलक्षणे यथा बाणनिर्माणाय ''शर'' नाम्न तृणमावश्यकमस्ति च कीदृशं शरमस्ति तस्युत्तरे हीनग्रन्थियुक्तं पूर्ण ग्रन्थियुक्तं विदीर्णं शरं, अपवशरं, स्थूलशरं च त्यक्त्वा सुपक्वं पाण्डुरं शुभनिमिजञ्चशरं स्वीकृत्याचार्यदेशानुसारं शरनिर्माणं करणीयम्।[18]

तथा च बाणानुसारेण बाणपृष्ठभागे काक–हंस–क्रौञ्च–शरा–गृध्रच कुरराणां पक्षीणां पक्षाः स्थापनीयम् एवं वशिष्ठानुसारेण स्त्री–पुरुष–नपुंसकानि त्रयप्रकाराणि बाणानि सन्ति।

तदनन्तरं बाणस्य फलवर्णनं कृत्वा तस्य कर्माणि वशिष्ठेन कथितानि। यथा –

| | | |
|---|---|---|
| **1.** आरामुखम् | – | चर्मवेधकार्थे |
| **2.** क्षुरप्रम | – | धनुषछेदनाय बाणछेदनाय च बाहुकर्तनाय |
| **3.** गोपुच्छम् | – | लक्ष्यसाधनाय अभ्यासे च |
| **4.** अर्धचन्द्रम् च | – | मस्तकछेदनाय ग्रीवा छेदनाय धनुरादीनां छेदनाय च |
| **5.** सूचीमुखम् | – | कवचभेदनाय |
| **6.** भल्लम् | – | हृदयभेदनाय |
| **7.** वत्सन्दतम् च | – | गुर्णचर्ब्वणाय प्रत्यञ्चा छेदनाय |
| **8.** द्विभल्लम् | – | बाणाद बाणावरोघनाय |
| **9.** कर्णिकम् | – | लोहमयेबाणानां छेदनाय |
| **10.** काकतुण्डम् | – | वेध्यानां वेधम् [19] |

**अथ पायनम् (शरे औषधलेपनम्) –**

महर्षि अनुसारेण बाणस्य फले शरवंशस्य मूलस्य लेपाद् लेपयुक्तस्य व्रणोऽसाध्यः भवति इति।

महर्षिवशिष्ठेन स्वस्य ग्रन्थे बाणोपरि औषधलेपनस्येका विशिष्टापद्धति वर्णिता यथा – यदा शरवंशस्य समूहोपरि वर्षायां स्वातिनक्षत्रकाले स्वातिनक्षत्रस्य जलपतनाद शरवंशो पीतवर्णस्य तीक्ष्णविषंमुत्पद्यते।[20] तस्य लक्षणं यत् स च वायुरभावेनापि सर्वदा शरवंशा कम्पयेते। तस्यैव मुलं गृहीत्वा पायनं निर्मातव्यम्।

यस्मिन् शरवंशसमूहे स्वातिबिन्दुर्निपतति स पीतवर्णो भवति। तस्य मूले विषयामुत्पद्यते, तन्मूलं ग्राह्यं। स च सर्वदा पवनाभावेनऽपि कम्पते।[21]

अन्यञ्च पिप्पली सैन्धवं–कुष्ठद्रव्यत्रयेन गोमूत्रेण सह सपेषयित्वा च अनेन शस्त्रं लेपयेत च लिप्ते अग्नौ प्रतापयेत। तदा तदौषध–प्रभावेन शस्त्रमुखं मयूरग्रीवानुवर्णसदृशः तप्तपीतं भविष्यति। तदन्तरणे शुद्धं जलं शस्त्रं पापयेत।[22]

एवं महर्षिणा विषयुक्त बाणफलस्य निर्माण विद्यं दर्शयति। अनन्तरेण महर्षिवशिष्ठो नाराच–नालिका शतघ्नीनां लक्षणं एव ददाति। यथा –

''सर्वलोहास्तु ये राणा नाराचास्ते प्रकीर्तिता।।''[23]

अर्थात् पूर्णलोहेन निर्मितबाणं इति नाराचमुच्यते। पञ्चपक्षाड्लकृते अस्मिन् बाणे कस्यचिदधनुर्धारारेव सिद्धाः भवति न सर्वाः।

'नलिका' लघुबाणाः ये सन्ति ये नलयन्त्रेण वानलिकायन्त्रेण चालयितुं शक्यते। तान् बाणान् अत्युच्चस्थानेषु युद्धेषु दुर्गयुद्धेषु प्रयोजितव्यम्।[24] अन्यञ्च सिंहासनसंरक्षरणाय दुर्गे वा गढे शतेघ्न स्थापयेत।

एवं महर्षिवशिष्ठो स्थानमुष्टयाकर्षणस्य लक्षणानां वर्णनं कृत्वा तत्र प्रत्यालीढ–आलीढ–विशाख–समपद–असमपद–दुर्दरक्रम–पद्यासनदीनां अष्टप्रकारस्थानानां वर्णनं कृतम्।[25]

तदन्नतरं श्रृणुमुष्टयावर्णने पताका–वज्र–सिंहकर्ण–मत्सरी–काक–तुण्डयादि मुष्टिः वर्णयित्वा तस्य प्रयोगन्चरणमपि वर्णितम्।

**धनुर्मुष्टि सन्धानम् –**

महर्ष्यानुसारेण धनमुष्ट्याः लक्षणं एवंमस्ति । यथा–

सन्धानं त्रिविधं प्रोक्तमधमूर्द्धं समं सदा।
योजयेत् त्रिप्रकारं हि कार्येष्वापि यथाक्रमम्।।[26]

1. अधःसन्धानम् – बाणं दूरयतित्वे
2. समसंन्धानम् – निश्चित्तानां लक्ष्यानां वेद्यनाय
3. उर्द्धसंन्धानम् – कठोरलक्ष्यानां वेधनाय

**धनुव्यायः –**

1. कैशिकव्यायः – केशस्य मूलप्रर्यन्तं बाणकर्षणं इतयुक्ते कैशिकव्यायः चित्रयुद्धाय कैशिकव्यायः प्रयोज्यताम्।
2. सात्विकव्यायः – श्रृंङ्ग (मस्तक) पर्यन्तमाकृष्टकरण –मित्युत्युक्ते स्वात्विकव्यायः अघोषलक्ष्याय सात्विकव्यायः प्रयुज्यताम्
3. वत्सकर्णव्यायः – फर्णपर्यन्तंमाकृष्टकरणीयं इत्युक्ते वत्सकर्णः व्यायः। सदाज्ञेयलक्ष्याय प्रयुज्यते।
4. भरतव्यायः – ग्रीवापर्यन्तमाकृष्टं करणीयम् इत्युक्ते भरतव्यायःकथ्यते। दृढ़भेदनलक्ष्याय प्रयुज्यते।
5. स्कन्धव्यायः – स्कन्धपर्यन्तमाकर्षणाय स्कन्धव्यायः प्रयुज्यते।दूरघातनाय स्कन्धव्यायः उपयुज्यताम्।[27]

एवं महर्षेः दृष्ट्या पञ्चप्रकराणानां व्यायाः अर्थात् धनुषः प्रत्यञ्चा– कृष्टाय पद्धतयः प्रसिद्धम्।

अन्ते महर्षिणावशिष्ठेन विश्वमित्रसम्मुखं लक्ष्यविभागवर्णयितवा धनुविद्यायाः पूर्वभूमिकां समाप्ता कृता।

**लक्ष्यम् –**

'लक्ष्यं चतुर्विधम्।'[28]

**1.स्थिरलक्ष्यम् –**

बाणगन्तव्यस्थाने स्थिरं लक्ष्यं स्थापयित्वा स्वयमपि स्थिरं भूत्वा क्रमेण। त्रयप्रकारैः लक्ष्यं वेधयेत्। यदा एवं स्थिरलक्ष्यस्याभ्यासवसाने सफलीधनुर्धरो भवेत्तदा लक्ष्यवेधी धनुर्धरं 'स्थिरवेधी' इत्युच्यते।

**2.चललक्ष्यम् –**

बाणगन्तव्यस्थाने चालितलक्ष्यं स्थापयित्वा स्वयं स्वस्थाने धनुर्धरो स्थिरो भूत्वा चलन्तंलक्ष्यं वेधयेत्। तदा भगवता आचार्येण शिवेन तत्लक्ष्यं चलंलक्ष्यं तत्प्रोक्तम्। लक्ष्याभ्यासावसाने सफलीधनुर्धरो 'चलवेधी' कथ्यते।

**3.चलाचललक्ष्यम् –**

बाणगन्तव्यस्थाने स्थिर लक्ष्यं स्थापयित्वा चलायमानधनुर्धरो लक्ष्यभेदं करोति। तदा तत्चलाचललक्ष्यं कथ्यते। तत्लक्ष्यवेधं साध्यं च कठिनमस्ति।

**4.द्वचालकलक्ष्यम् –**

यदा लक्ष्यं च धनुर्धरः उभावपि चलौ तदाद्वयाचलं द्वयालस्य लक्ष्यं[29] अत्यधिक श्रमेण अभ्यासेन च साध्यं भवति इति।

श्रमेण स्खलितादृष्टिः शीघ्रसंधानमाप्यते।
श्रमेण चित्रयोधिस्त्वं श्रमेण प्राप्यते जयः।
तस्माद गुरुसमक्षं हि श्रमः कार्यो विजानता।।[30]

महिमागानं कृत्वा महर्षि भूमिकां समपयति। अत्र ग्रन्थे सम्पूर्णे विभागत्रयाः प्रकल्पिता।

प्रथमेभागे शतश्लोकेषु धनुर्वेदस्य परमपरा धनुर्वेदस्य विषयः –युद्धानि –धनुर्दानिविधिः –चापवर्णनं –गुणलक्षणानि –सरललक्षणनि –फललक्षणानि शरोपरिपानम् –स्थानानिगुणमुष्टि –धनुर्मुष्टिसन्धनम् –धनुव्यायाः –स्थानाभि –लक्ष्याभ्यासादि प्रारम्भिकविषयानां वर्णनमस्ति।

द्वितीये विभागे लक्ष्याभ्यासस्थास्वरूपाणि च त्यक्तबाणस्य गत्यानुसारेण तस्य फलकथनादिववर्णनं दक्षिणहस्तेन यः धनुर्धरो वामहस्तेन धनुः च दक्षिणहस्तेन् बाणं गृहीत्वाभ्यासं करोति सचिरादेव सिद्धिं प्राप्यते।[31]

वामहस्तेन सिद्धो भूत्वा दक्षिणहस्तेऽपि अभ्यासं करणीयम्। पुनः वामहस्तेनापि अभ्यासं करणीयम्।[32]

सूर्योदयसमये पश्चिमदिशि च अपराह्नकाले प्राञ्चदिशि लक्ष्यं–स्थापयित्वा करणीयम्। उत्तरदिशि अवरोधकाले लक्ष्यंस्थापयित्वाभ्यासं करणीयं च सङ्ग्रामेण विना दक्षिणदिशि अभ्यासो न करणीयम्।[33]

तदनन्तरं कोदण्डधरश्च लक्ष्यं द्वयोः मध्ये अन्तराधारेण लक्ष्यस्य वर्गीकरणं भवति।

**1.द्वयोः मध्ये अन्तरालः –**

⇒ 60 धनुः अर्थात्
240 हस्तः अन्तरे लक्ष्यं
स्थापयित्वा वेधः – उत्तमलक्ष्यम्।

⇒ 240 धनुः अर्थात्
160 हस्तः अन्तरे लक्ष्यमं –
स्थापयित्वा वेधः – मध्यमलक्ष्यम्।

⇒ 20 धनुः अर्थात्
80 हस्तः अन्तरे
स्थापयितवा वेधः – कनिष्ठलक्ष्यम्।[34]

एवं सर्वलोहमय नाराचस्य चालनस्य अभ्यासाय यथा –

⇒ 40 धनुः अन्तरे उत्तमलक्ष्यम्।

⇒ 30 धनु अन्तरे मध्यमलक्ष्यम्।

⇒ 16 धनु अन्तरे कनिष्ठलक्ष्यम्।[35]

अन्यञ्च धनुर्धराणां सूर्योदये (प्रभाते) च सन्ध्याकाले चतुशतै बाणैः यो ही लक्ष्यं विसर्जयेत।

⇒ सः ज्येष्ठधनुर्धरः।
यो त्रिंशतैः काण्डैः विसर्जयेत् स मध्यम धनुर्धरः।
यो द्विशताभ्यां बाणाभ्यां विसर्जयेत् स कनिष्ठ धनुर्धरः।।[36]

**अथानध्यायः –**

वशिष्ठानुसारेण ।
अष्टमी – अमावस्या –चतुर्दशी–पूर्णिमायाः अर्धदिने।
वर्षाकालं त्यक्त्वा अकाले मेघगर्जने, वर्षाभवेत् तदा।
धनुर्धरस्य प्रथमबाणतः लक्ष्यभेदेन न भवेत तदा –

⇒अनुराधा नक्षत्रामारभ्य षोडशनक्षत्रपर्यन्तं –पश्चादपि दिवाकरो प्रचक्षते तदा अकालो तत्काले तत्फलं कथ्यते। तदा –

⇒ अरुणोदयवेलायां यदा वारिदो गर्जति तदा तद्दिने।

⇒ श्रमं कुर्वतस्तत्र भुजङ्गां दृश्यते वा कोदण्डनं भज्यते। तदा –

⇒ वा प्रथमे  बाणमोक्षणे प्रत्यञ्चा त्रुट्यते तदा एतत्काले धनुर्विद्यायाः अभ्यासं न करणीयम् ।[37]

**अथ श्रमविद्या –**

प्रथमं चापमारोप्य चूलिकां बन्धयेभूतः स्थानिकं ततः कृत्वा बाणोपरि हस्तं स्थापयेत। वामपाणिना धनुः तोलनं कृत्वा धनुषि बाणस्यादानञ्च सन्धानं कृत्वा आकृष्टधनुषा प्रथमं भूमिवेधं न कारयेत्। सर्वप्रथममं 'मां' इत्युक्ते आद्यवक्तामहादेव च विघ्नराजगणेशं –गुरुं धनुः च शरान्नमस्कारं कुर्यात्। तदन्तरं बाणस्याकर्षणाय याचितव्या गुरोराज्ञा। प्रयत्नेन प्राणेन सह प्राणवायुं पूरयेत् कुम्भकेन प्राययमेन भीतरे प्राणवायुं स्थिरं कृत्वा हुङ्कारेण बाणं वसर्जयेत् इति। एवं अभ्यासेन प्रयत्नेन षड्मासे – मुष्टिसिद्धिं,  संवत्सरे – बाणसिद्धिं भवति।

किन्तु 'नाराचास्तस्य सिद्धयन्ति यस्य तुष्टो महेश्वरः ।[38]

**शीघ्रसन्धानम् –**

तूणीरात् बाणस्यादानं चैव सन्धानं कर्षणं क्षेपणं च यः त्वरायुक्तो कुरुते नित्याभ्यासवशाश्चस्य शीघ्रसंधानतां भवेत् ।[39]

**दूरपातित्वम्** –

पताका नाम मुष्ट्या स्त्रीचिन्हयुक्तंबाणं दूरं पतति ।[40]

**दृढ़भेदनम्** –

प्रत्यालिढं कृत्वा अधः सन्धानं करणीयम्। दुर्दरेस्थाने स्थित्वा ऊर्ध्वसन्धानं करणीयम्। स्कन्धव्यायेन च वज्रमुष्टया पुरुषबाणस्य सन्धानं करणीयम्। पश्चात् हस्तेन बाणं त्यजेत् तदा दृढ़भेदनस्य क्षमतां प्राप्यते ।[41]

**हीनगति समूहः** –

त्यक्तकाले बाणस्य पत्रं विलोकितं तत्बाणं इत्युक्ते हीनपत्रं च तस्य हीनप्रत्रस्य गतिः सूचिमुखा प्रजायते।

यं बाणं हीनमुष्टिना च कर्कशकौदण्डेनाकृष्ट्वा त्यक्तबाणं 'मत्स्यपृच्छा' इति कथितम्।

अभ्यासकर्मकाले त्यक्तबाणं यदि वक्रगत्यावलम्बनं करोति तदा तत्बाणगतिं भगवानशिवेन 'भ्रमरीगतिः' इति नामधेयम् ।[42]

अनन्तरं महर्षिवशिष्ठेन शिवप्रोक्तं बाणस्खलनगतिसमूहश्च समूहस्योदाहरणानि दत्वा शुद्धगतेः वर्णिता ।[43]

लक्ष्यंबाणग्रभागञ्च धनुर्धरस्य दृष्टित्रयेषु सङ्गतिः यदाभवेत्। तदानीं मुञ्चितबाणं निश्चयेन लक्ष्यभेदनं करोत्ये एव।[44]

निर्दोषः शब्दविहीनश्च प्रत्यञ्वा च धनुः द्वयोः मुष्टिं समानेव साधयित्वा मुञ्चितबाणं दृढ़भेदनमपि भेद्यति।[45]

श्रेष्ठधनुर्धराय महर्षिवशिष्ठं एव कथ्यति ––

यस्य तृणसमा बाणाः यस्येन्धनसमं धनुः।
यस्य प्राणसमा मौर्वी स धन्वी धन्विनां वरः।।[46]

**दृढ़ चतुष्कम्** –

यस्य धनुर्धरस्य बाणं लोहश्चर्मघटश्चैव मृतपिण्डश्च चतुष्टयं भिणति तस्य बाणं वज्रादपि न विदीर्य। तथा च सार्द्धा्रुलप्रमाणं स्वीकृत्य लोहपत्राणि निर्मित्य तानि लोहपत्राणि भिष्वैकबाणेन तु तदा धनुर्धर दृढ़घाती भवेत्।[47]

यो धनुर्धरो एकबाणात् चतुर्विंशतिचर्मणि भिनति तस्य बाणं गजेन्द्रस्य शरीरं निर्भेद्य निर्गच्छति।[48] लोहनिर्मितपदार्थं काकातुण्डेन बाणेन च मृतपिण्डञ्च घटं सूचीमुखबाणेन वेधीतव्यम्।[49]

**चित्रविधिः** –

यो धनुर्धरो बाणभङ्ग–काष्ठच्छेदन–बिन्दुक गोलयुग्मानां वेधनविधिं वेत्ति स धनुर्धरो समरा›णे विजयी भवेत्। च किञ्चिदं मृष्टिं तिर्यङ्क कृत्वा द्विफलकेषुणा (तद्विफलयुक्तबाणेन) धनुर्धरो लक्ष्यस्थाने स्थापितगणं छेदयेत।

यो योद्धा आकाशैव बाणेन बाणं छेद्यते स ''बाणच्छेदी'' उच्यते।[50]

**काष्ठभेदनम्** –

लक्ष्यस्थाने गोपुच्छाकृतिं सार्द्धं काष्ठं न्यसेत। यो धन्वी तं काष्ठं क्षुरप्रेण बाणेन छिन्द्यात् स काष्ठच्छेदो काष्ठभेदी जायते।[51]

रथस्थेन गजस्येन हयस्थेन च पतिना –

धावता वै श्रमः कार्य्यो लक्ष्यं हन्तुं सुनिश्चितम्।[52]

तदन्तरं गाधिपुत्रं विश्वामित्रं वायोः दिशानुसारेण लक्ष्यानुसन्धानं करणीयम्। 'पवनो योद्धानां लक्ष्यवेधने भङ्कसूचकोऽस्ति। (निष्फलतासूचको)[53] इति सूचयित्वा शब्दवेधित्वं वर्णयति।

**शब्दवेधित्वम् –**

यत्र यस्मिन्स्थाने शब्दस्तं उत्पद्यते योद्धा तत्र सम्यक् कर्णेन्द्रियमनो –योगाल्लक्ष्यं चिन्तयेत च धनुर्धरेण लक्ष्यं निश्चितं कृत्वा लक्ष्यभेदनं करणीयम्। पुनः युद्धशास्त्रस्य विधानानुसारेण कास्यपात्रं नित्यं–नित्यं किञ्चितदूरं कृतं एवमेव शब्दवेधनहेतवे कुशाग्रबुद्धिवानधनुर्धरो बाणेन शब्दश्रवणाधारेणवधानेन तल्लक्ष्यं हन्यात्। दुष्करेमतद्कर्म भाग्येकस्यापि सिद्धयति।[54]

**प्रत्यागमनम् –**

'खगम्' नामधेयंबाण हे राजेन्द्र विश्वमित्र। वायुसम्मुखे यदि प्रक्षिपेत् च बाणः रञ्जकस्य नालिकासवृत्तं स्यात् तर्हि बाणस्य पुनरागमनं लक्ष्यं छेदयित्वा भवेत्।[55]

**अथास्त्रविधिः –**

अश्विनमासे नवमीतिथौ ईश्वरो चण्डीं गुरुंपाणिनः शस्त्राणि पूजयेत्। ब्राह्मणेभ्यो दक्षिणां दत्वा कुमारी भोजयेत्। वादित्रम›लपूर्वकैः देव्यैः पशुबलिं दद्यात्। ततस्तु अस्त्राणि च कर्मसिद्धयर्थाय आममोदितान् वेदोक्तान मन्त्रान् जयहोमपूर्वकेन् साधयेत्।[56]

अन्यञ्च –

ब्राह्मं नारायणं शैवमैन्द्रं वायव्यवारुणे।
आग्नेयं चापराशास्त्राणि गुरुदत्तानि साधयेत्।।[57]

**अथास्त्राणि –**

विश्वामित्र सावधानं कृत्वा महर्षिवशिष्ठोऽस्त्रविषयानि वर्णयन्ति यथा–

अथस्त्राणि प्रवक्ष्यामि सावधानोऽवधारय।
ब्रह्मास्त्रं प्रथमं प्रोक्तं द्वितीयं ब्रह्मदण्डकम्।।
ब्रह्मशिरस्तृतीयञ्च तुभ्यं पाशुपतं मतम्।
वायव्यं पञ्चमं प्रोक्तंमाग्नेयं षष्ठकं स्मृतम्।।
नरसिंह सप्तमञ्च तेषां भेदाह्यानन्तकाः।
ससंहार सविज्ञेयं श्रृणु गाधे यथातथम्।।
वेदमात्रा सर्वशास्त्रं गृह्यते दोप्यतेऽथवा।

तत्प्रयोगं श्रृणु प्राज्ञ! ब्रह्मस्त्रं प्रथमं श्रृणु ।।[58]

**अस्त्राणां मन्त्रासंस्काराः –**

अत्र भगवानमहादवो परशुरामं प्रति कथयति यत् 'द' आदि 'द' अन्ते च सह विपरीतां सावित्रीं जपेत्। निखपर्यन्तं मन्त्रान जपत्वा विधिवच्छशरमभिमन्त्रेऽयं सहसा क्षिपेच्छत्रुषु तेन प्रहारेण शत्रूणां सर्वजातयः नश्यन्ति।[59]

बाला वृद्धाश्च गर्भस्था ये च योद्धुं समागताः।।
सर्वं ते नाशमायन्ति मम चैव प्रसादतः।[60]

तत्ब्रह्मास्त्रस्य संहाराय (स्थगिताय) पूर्वेणप्रकारेण 'द' आदि अन्त सावित्रीं जपानियम्।[61]

ब्रह्मदण्डप्रयोगाय –प्रथमं ॐ प्रणवमुच्येत् पश्चात् 'प्रचोदयाज्'ततः नो यो धियः क्रमेण उच्चारयेत्। 'ततो धीमहि देवस्य' भर्गोवरेण्यम्' च सवितुः' येन शब्देन सह 'अमुकशत्रुं' योजयित्वा उच्चारयेत्।

ततो हन् हन हुं 'फट' द्विलक्ष्यकं पूर्वं जपत्वा शरं अभिमन्त्रस्य तद्वत्शरं प्रक्षिपेत् शत्रुषु।[62] ततः ––

नश्यन्ति शत्रवः सर्वे यमतुल्या अपि ध्रुवम्।
एतदेव विपर्यस्तं जपेत् संहारसिद्धये।।[63]

**ब्रह्मशिरस्त्रप्रयोगायः –**

प्रथमं प्रणवमुच्यरेत् ततः 'धियो यो नः प्रचोदयात् भर्गो देवस्य धीमहि' 'तत्सवितुर्वरेण्यम्' शत्रून्मे हन हनेति। एभिः शब्देभ्यः सह हुं 'फट' शब्दं योजयित्वाब्रह्मशिरशस्त्रं क्षिपेत्।[64]

पुरचर्यां पुरस्कृत्वा त्रिलक्ष्यं नियतः शुचिः।
नश्यन्ति सर्वे रिपवः सर्वे देवासुरा अपि।
इदमेव प्रयोक्तव्याः विपर्यस्तं विकर्षणे।।[65]

**पाशुपतास्त्रम्** –

अतः परं प्रवक्ष्यामि चास्त्रं पाशुपतन्तव।
यस्य विज्ञानमात्रेण नश्यन्ति सर्वशत्रवः।।

'द' आदि च 'दा' अन्ते कृत्वा प्रोच्च सावित्रीं प्रणणञ्च क्लीं पशं हुं फटं अमुक शत्रून् हन् हन् हुं फट् स्वाहा। एषंपंक्तिं द्विलक्षं जप्त्वा ततः पाशुपतं क्षिपेत्।[66]

अस्यास्त्रस्य निर्वाणाय अपि च–

पुनस्तदेवव्यस्तं स्यात् संहारेतां नियोजयेत्।
एतत् पाशुपतं चास्त्रं सर्वशत्रुनिवारणम्।।[67]

एवमेव –

**वायव्यास्त्रस्य मन्त्रोऽस्ति –**

ओं वायव्या या वायव्ययन्योर्वाय या वो अमुकं शत्रूम् हन् हन् हुं फट्।

द्विलक्षसंख्या पर्यन्तं मन्त्रं जपत्वा प्रयोजयेत्।[68]

**आग्नेयशास्त्रम् –**

ओमाग्निस्त्यता हृद्ञ्च शिवं वनाश्वाविणि दुर्गादशरूपनः सद्वेत्ति हादति तोयति राम मते हित्वा वान् सुसेदवेदया अमुकः – द्विलक्षसंख्यापर्यन्तं मन्त्रस्य पुरश्चरणं कृत्वा प्रयोजयेत् च अस्त्रसंहाराय इमं मन्त्रं पुनर्व्यक्तं संहारे चैव योजयेत।[69]

**नृसिंहास्त्रम् –**

ऊँ वज्रनखवज्रदंष्टायुद्धाय महासिंहाय हुं फट पूर्वं सः मंत्रो 1 लक्षसंख्यायां जपत्वा प्रयोजयेत। अन्ततागत्वा –

पूर्वोक्तेन प्रकारेण संहारश्च प्रकल्पयेत्।
संक्षेपेयतो महाभागे तवोक्तानि महामते।।
भेदास्तेषां शिवेनैव हयनन्ताः परिकीर्तिताः।। [70]

एवमेव शिवप्रोक्तानेकास्त्रभेदाः महर्षिणावशिष्ठेनराजर्षे विश्वामित्राय संक्षेपतःकथिताः।[71]

तृतीयप्रकरणेऽऽरम्भे शौर्योत्साहवर्धकौषधीनां वर्णनमस्ति। अनन्तरं विधिरूपवासः संग्रामविधिं वर्णितमस्ति। तत्पश्चात् परमात्मां विरूपाक्षं भालनेत्रंमहादेवं मन्त्रेण ध्यात्वा हेमवतीं दुर्गाध्यानं ध्यायेत।[71]

महर्षिवशिष्ठेनानुसारेण –अपूर्णस्वरेण योद्धा शत्रोः सामग्री भवेत् किन्तु पूर्णेन स्वरेण स्वसैन्यसहिताशेषबलवन्तो भवतीति।[72] एवं युद्धे स्वरशास्त्रस्य महत्वं आवश्यकं निरूपणं करोति। अन्यञ्च युद्धस्यशिक्षाधिकारीविषये कथ्यते यत् –

न देयमिति क्रूराय कुबुद्धयेऽशान्ताय। गुरु द्रोहिणेऽभक्तायेति। देयमिति ब्रह्मचारिणो धर्म्मतः प्रजापालः दुष्टदण्डविधारिणे साधुसंरक्षणाय इत्येव प्रवचनं प्रवचमिति।[73]

तदन्नतरं राहुयुक्तायोगिनीदृष्टयां युद्धस्यविवरणं कृत्वा विश्वामित्रेण सह व्यूहदिभिर्युद्धस्य चर्चां कराति।[74]

**व्यूहवर्णनम् –**

दण्डव्यूहश्च शकटो वराहो मकरस्तथा।

सूचीव्यूहोऽथ गरुड़ः पद्मव्यूहादयोः मनाः।।
एतान् व्यूहान् परिव्यूह्य सेनापतिर्वसेत् सदा।
बलाध्यक्षादिकान् सर्वान् सर्वदिक्षु नियोजयेत्।।[75]

**दण्डव्यूहः** –

सर्वतोभये दण्ड–व्यूह रचीतव्यः।

**शकटव्यूहः –**

पृष्ठतो भये शकट–व्यूह रचितव्यम्।
पृष्ठतोद्देशे भये समुत्पन्ने शकटव्यूहं रचयेत्।।।[76]

**गरुड़व्यूहः/ वराहव्यूह ––**

पार्श्वभये वराहव्यूहो गरुढ़व्यूहो च रचयेत्।[77]

**पिपीलिकाव्यूह –**

सन्मुखे अग्रतोभये शत्रुभये जाते पिपीलिका पंक्तिरूपोव्यूहो कारयेत।[78]

1. स्वल्पासेना – स्वल्पासेना युद्धं कुर्यात्।
2. विशालसेना – बृहद्सेना सर्वतो भ्रमेत्।
3. अश्वसेना – समतलौ भूमौ युद्धं कुर्यात्।
4. जलसेना – हस्ति–तुम्बी–मसकनौकाभिः जले युद्धं कुर्यात्।
5. पदातयःसेना – भुशुण्डीं गृहीत्वा वा धनुंषिसायकान् गृहीत्वा वने वृक्षेष्वन्तर्धनां वा वृक्षाऽऽरूढ़ा भूत्वा युद्धयत्।
6. स्थलप्रदेशे – चर्मखडगं/भल्लैः युद्धयत् युद्धेऽपि युद्धोत्सहत्सही सैनिकान् युद्धागे स्थापयित्वा अन्यन् पश्चात्।[79]

**अथ् सेनान् च** –

महर्षिणा वशिष्ठेन विश्वामित्रं उद्देश्य सेनानस्य सैन्यशिक्षां पूर्वे व्याकरण ज्ञानस्य अभ्यासं करणीयम् इति कथितम्। सेनानयस्य कृते कीदृशः शास्त्रस्याभ्यासं करणीयम् इति यथा – सेनासञ्चालकाय व्याकरणशास्त्रं च नृपाय धातूनां लोटलकारस्य रूपाणि कण्ठस्थ करणीयम्। येन कारणेन कार्यं सिद्धयति। येन सर्वं मम् इत्युक्ते महादेवस्य शिवस्य आज्ञयाः इति।[80]

भगवतः महादेवस्य कथनानुसारेण मध्यमपुरुषस्येव रुपानाञ्च तः प्रयोगैः सह प्रतिदिनं सम्यकरूपेण विचिन्तयति स सेनाध्यक्षो केनापि न हन्यते। मध्यमपुरुषोद्भुतं प्रयोगाः सर्वसिद्धि दायकाः अतः राजसेवका

राज्ञां पुरुषा च प्रयत्नेन व्यकारणं शिक्षां च तस्यां मध्यमपुरुषोद्भवान् प्रयोजन साधयित्व्यम् ।[81]

**प्रदातिक्रमः –**

भगवतावशिष्ठानुसारेण पदातिसेनायाः सैनिकानां योग्यता इदृशाभवेत् ।

यथा सेनायां सनिकाः समोच्चाः ग्राह्या। अधिकह्रस्वा वा दीर्घा न ग्राह्याः ।कारणं यत् कूर्दमे धावने च ये वै समानसैनिकाः कार्यसाधकाः भवन्ति इति। तत्र पदातिक्रमसेनायाः भटान् – पश्चात्गमनं –स्थिरीकरणं शयनं–धावनं चलनं–शत्रुसेनायां पार्श्वदिक्षुः प्रवेशं चादि कार्य कारयेत् ।[82]

अत्राचार्योः स्वस्य ज्योतिषव्याकरणयोः ज्ञानस्य आधारेणोक्तं यत् येषां सैनिकस्य षष्ठस्थाने क्रूरग्रहाः यथा (रविः च म›लः) पापग्रहा च शनि–राहु–केतु च रिक्ता सर्वे ते वीरभटाः। रोचकयुद्धं कुर्वन्ति च नान्या युद्धयोग्याः ।[83]

अन्यञ्च य–भ–ध–ड–छ आदि वर्णाः पूर्वसेनायाः लिखिता पश्चात् अच् (स्वराः) वर्णानाां लेखनं करणीयम्। तदन्तरं सेनायां यस्य युवस्य स्वरोऽस्ति स सेनाग्रगामी भूत्वा युद्धयतु इति ।[84]

यथा–अत्र महर्षिणा व्याकरणानुसारेण च ज्योतिषानुसारेण कोऽक्षरयुक्तनाम –धारिणं सेनाानयं च कीदृशं र›परिवेशादीनां यूप–ध्वजादीनां द्वारा स्वस्य सेना–अलङ्कारिता करणीया इति कथितम्। यथा –

विवस्थान्–भरत–धन्धुमार–डित्थ–छात्रपति कुक्षि आदि अक्षरवान–नाम्नां सेनायानां सेना प्रथम युवास्वरे युद्धयति तदा निश्चयेन विजयं प्राप्नोति। तस्याः सेनायाः वस्त्राणि पीतानि ध्वजा पीतापीतः युद्धयूयश्च भवति स्म ।[85]

वशिष्ठानुसारेण प्रथमा पीतवर्णासेनां त्यक्वा परापञ्चप्रकाराणां सेनां नित्यं विजयलाभसुखेच्छुभिः राजाभिः द्वारा कर्तव्या। तदानुसारेण सेनाषु श्वेता रक्ता–हरिता–कृष्णा अन्या च वर्णयुक्ता सेना निर्मिता इति ।[86]

पञ्चसेनायां पञ्चदेवाः प्रायेणाधिपति देवाः स्युः यथा –

ब्रह्मा–विष्णुश्च –रुद्रश्च –चन्द्रसूर्ययौ यथा क्रमम्।
अधीशाः पञ्चसेनानां विज्ञेयाः श्रृणु गाधिजः।।[87]

1. ब्रह्मा–रुद्रबले जयेत्।
2. विष्णु – चन्द्रबलं गृहीत्वा विजयति।
3. रुद्रः – सूर्यबले प्राप्त्वा विजयति।
4. चन्द्रः – ब्रह्मबलं स्वीकृत्य जयति।
5. सूर्यः – विष्णुबलं लब्ध्वा जयेत्।

एवमेव महर्षिणा वशिष्ठेन् पञ्चसेनानां पञ्चदेवता च पञ्चस्वरापि कथिता यथा –

अब्रह्मा विष्णुरिरुद्र उश्चवन्द्रत्वे च भास्करः।
ओ ज्ञेया पार्थिवै नित्यं अस्त्रशस्त्रविचक्षणैः।।[88]

प्राप्य स्वं स्वं बलं सेना पूर्वोक्ता युद्धगा यदि।
क्षणार्द्धेनारीन सर्वान् मारयञ्तीनि रुद्रवाक्।।[89]

**अथ–अश्वक्रमः –**

इदमश्वक्रमविभागे युद्धे–उपयुज्यावश्वानांभ्यासो वशिष्ठेन् कथं करणीयम् इति वर्णितम्। यथा – अश्वान् मण्डलं (वतुलाकारं ) चतुरस्त्रं–गोमूत्राकारं –अर्धचन्द्रकारं –नागपाशादियनत्रैः द्वारा (प्राणाल्यानुसारेण ) क्रमेण युद्धशिक्षां दापयेत्। इति।[90]

हस्तिक्रम –

अश्वैव गजापिपर्वतारोहण–जलगमन–धावन–उत्थान–उपवेशन अलात्चक्रादिक्रमेण अभ्यासेन भयनिवारणाय सप्रकार्माणि करणीयम्।[91]

रथक्रमः –

संहिताया रथयुद्धस्यधिवर्णनं न प्राप्यते। तत्र एकां पंकत्यां महर्षिणा कथितं यत् – रथाश्वसाधनन्तु समादिस्थलेविधेयम्।।[92] अर्थात् स्थादिसाधनाय अश्वान् समतलभूमौ चालयेत्।

**सेनापति करणविधिः –**

सेनापति समस्तसेनायाः सञ्चालकोऽस्ति वशिष्ठानुसारेण तस्य शरीरस्याकार विद्याबलयुक्ताधारेण सेनापतेः चयनं करणीयम् अन्यञ्च स सेनानयः समस्तसेनां एकदृष्ट्यामवलोकयेत्।

सर्वान् पदातीन् परिश्रमानुसारेणाधिकारं दधात्।

युद्धे च व्यूहरचनायामति निपुणो भवेत्। एवं महर्षिणावशिष्ठेन सेनापतेः लक्षणानि अर्थात् सेनापतिकरणविधिः वर्णिता।[92]

**अथशिक्षा –**

सेनापतिचयनं पश्चात् महर्षिणा सेनानाय शिक्षा–अर्थात् पठन–पाठनविधिः वर्णिता। यथा आदौ क्षात्रकोशस्य किं वा समरशास्त्रस्य कोशस्य च व्याकरणसूत्राणाञ्च अध्ययनं करणीयम्। मनुसंहितायाः सप्ताष्ठययोः अध्याययोः, –याज्ञवल्क्याः स्मृत्याः मिताक्षराटीकायां व्यवहारोऽध्यायस्य च युद्धजयार्णवस्य च विष्णुयामलस्य विजयाख्यातनत्रस्य स्वरशास्त्रस्य चान्यावश्यकग्रन्थानामध्ययनं सेनानयायावश्यकमस्ति। तत्पश्चात् धनुर्वेदस्याध्ययनं करणीयम्।[93]

**हन्तव्याहन्तव्योमदेशः –**

भगवतः महादेवस्यादेशानुसारेण वशिष्ठकथनानुसारेण सुप्तं –प्रसुप्तं–उन्मतम्–हयकच्छं–शास्त्रविहीनं–बालं–स्त्रीयं–दीनवाक्योद्‌गतां – धावन्तं धावन्तमादीनां चैव हन्तव्यम्।[94]

अन्ततोगत्वा युद्धे पुराक्रमेण यः प्राणं त्यजाति तस्य गत्याः वर्णयित्वा महर्षिणाः स्वरूप ग्रन्थावसानं कृतम्।

धम्मार्थं त्यजेत् प्राणान् किं तीर्थे च जये च किम्।
मुक्तिभागी भवेत् सोऽपि निरयं नाधिगच्छति।।
ब्राह्मणार्थे गवार्थे वा स्त्रीणां बालवधेषु च।
प्राणत्यागपरो यस्तु स वै मोक्षमाप्नुयात्।।[95]

अर्थात् यो धर्माय प्राणान् त्यजेत् यं किं तीर्थेषु किं जयेषु किं यज्ञेषु सो निःसंशयेन मुक्तिभागी भवति इति नाति नरके गच्छति। अन्यञ्च यो ब्राह्मणाय–गवार्थे बालकेभ्यः स्त्रीभ्यः स्वस्य प्राणाहुति ददाति स मोक्षं प्राप्नोति इति निश्चयेन्।

एवं उपुर्यक्तरूपेण अस्मिन् ग्रन्थे यत्सर्वनिरुपितमस्ति तद् धनुर्वेदविद्याविषय–युद्धविषये चावश्यकं वा ज्ञातव्यमस्ति। ग्रन्थावसाने युद्धेषु समष्टिकल्याणाय स्वस्यस्वहितं च प्राणं त्यक्त्वा पराक्रमेण प्राणबलिं ददाति तेषां प्राणान्त्यक्तानां यशोगथा गापयित्वा महर्षिवशिष्ठो विश्वमित्रसम्मुखं ग्रन्थं समर्पयति। एवं संक्षेपेण ग्रन्थस्य विहंगावलेकनं कृतम इति।

## सन्दर्भ–सूची


**1.** धनुर्वेदसहिंता –2
**2.** धनुर्वेदसहिंता –3
**3.** धनुर्वेदसहिंता –10
**4.** धनुर्वेदसहिंता –5–6
**5.** धनुर्वेदसहिंता –10
**6.** धनुर्वेदसहिंता –6
**7.** धनुर्वेदसहिंता –8
**8.** धनुर्वेदसहिंता –9
**9.** आचार्य सप्तयुद्धाय स्याच्यतुर्भिर्भार्गवा स्मृतः।
द्वाभ्यां चैव भवेद्योद्य एकेन गणको भवेत्।। धनु.–10
**10.** धनुर्वेदसहिंता –11 तः 15
**11.** धनुर्वेदसहिंता –16 तः 21
**12.** धनुर्वेदसहिंता –24 तः 29
**13.** धनुर्वेदसहिंता –31
**14.** धनुर्वेदसहिंता –32–34
**15.** धनुर्वेदसहिंता –35
**16.** धनुर्वेदसहिंता –38
**17.** धनुर्वेदसहिंता –38–55
**18.** अनःपहं प्रवक्ष्यामि शराणाम् लक्षणं शुभम्।
स्थूलं नाति सूक्ष्मम् नोऽपक्वं न कुभूकर्मजम्।। धनु. –56
**19.** धनुर्वेदसहिंता –64–66
**20.** भवति। तद्धिहनमेतत। यस्मिन् शरवंशसमूहे स्वातिबिन्दुर्निपति स पीतवर्णो भवति। तस्य मूले विषमुत्यपद्यते, तन्मूलं ग्राह्यं। स च सर्वदाः पवनाभावेऽपि कम्यतते इति । – धनुर्वेद–69
**21.** धनुर्वेदसहिंता
**22.** धनुर्वेदसहिंता –70.–72
**23.** धनुर्वेदसहिंता –1/73
**24.** नालिका लघवा बाणा नाराचास्ते प्रकीर्तिताः।
अत्युच्चयदूरपातेषु दुर्गयुद्धेषु ते मताः।। – धनु.–74
**25.** धनुर्वेदसहिंता – 76–83, 84–89

**26.** धनुर्वेदसहिंता –90
**27.** धनुर्वेदसहिंता –1/92 तः 94
**28.** धनुर्वेदसहिंता –1/95
**29.** धनुर्वेदसहिंता –1/95 तः 100
**30.** धनुर्वेदसहिंता –1/ 99–100
**31.** धनुर्वेदसहिंता –3/2–3
**32.** धनुर्वेदसहिंता –2/3
**33.** धनुर्वेदसहिंता –2/4–5
**34.** धनुर्वेदसहिंता –2/6
**35.** धनुर्वेदसहिंता –2/7
**36.** धनुर्वेदसहिंता –2/8
**37.** धनुर्वेदसहिंता –2/11 तः 16
**38.** धनुर्वेदसहिंता –2/23
**39.** आदानं चैव तूणीरात् सन्धानं कर्षणं तथा।
क्षेपणं चत्वरा युक्ता बाणस्य कुरुते तुयः।।
नित्याभ्यास वशान्ततस्य शीघ्रसन्धानता भवेत्। –धनु–2/31
**40.** मुष्ट्या पताकया बाणं स्त्री चिह्नं दूरपातनम्।।
–धनु–2/31–32
**41.** धनुर्वेदसहिंता –2/31–33
**42.** धनुर्वेदसहिंता –2/34–37
**43.** धनुर्वेदसहिंता –2/38–39
**44.** धनुर्वेदसहिंता –2/43
**45.** धनुर्वेदसहिंता –2/44
**46.** धनुर्वेदसहिंता –2/46
**47.** धनुर्वेदसहिंता –2/47–48
**48.** धनुर्वेदसहिंता –2/41
**49.** धनुर्वेदसहिंता –2/50
**50.** धनुर्वेदसहिंता –2/52–54
**51.** धनुर्वेदसहिंता –2/56
**52.** धनुर्वेदसहिंता –2/52
**53.** धनुर्वेदसहिंता –2/53
**54.** धनुर्वेदसहिंता –2/65–69
**55.** धनुर्वेदसहिंता –2/70/78

**56.** धनुर्वेदसहिंता –2/72–75
**57.** धनुर्वेदसहिंता –2/76
**58.** धनुर्वेदसहिंता –2/79–82
**59.** धनुर्वेदसहिंता –2/82–83
**60.** धनुर्वेदसहिंता –2/83
**61.** धनुर्वेदसहिंता –2/84
**62.** धनुर्वेदसहिंता –2/84
**63.** धनुर्वेदसहिंता –2/87
**64.** धनुर्वेदसहिंता –2/83–84
**65.** धनुर्वेदसहिंता –2/90
**66.** धनुर्वेदसहिंता –2/91
**67.** धनुर्वेदसहिंता –2/93
**68.** धनुर्वेदसहिंता –2/94–95
**69.** धनुर्वेदसहिंता –2/96–97
**70.** धनुर्वेदसहिंता –2/98
**71.** धनुर्वेदसहिंता –3/1–12
**72.** धनुर्वेदसहिंता –3/15
**73.** धनुर्वेदसहिंता –3/33
**74.** धनुर्वेदसहिंता –2/33–34
**75.** धनुर्वेदसहिंता –3/48–49
**76.** धनुर्वेदसहिंता –3/49
**77.** धनुर्वेदसहिंता –3/49–51
**78.** धनुर्वेदसहिंता –3/51
**79.** धनुर्वेदसहिंता –3/52
**80.** धनुर्वेदसहिंता –रूपाणि कार्यसिद्धयर्थ ह्याज्ञैषा मम गाधिजः।/52
**81.** धनुर्वेदसहिंता –3/53
**82.** धनुर्वेदसहिंता –3/54–56
**83.** धनुर्वेदसहिंता –3/56
**84.** धनुर्वेदसहिंता –3/56
**85.** धनुर्वेदसहिंता –3/57
**86.** धनुर्वेदसहिंता –3/58
**87.** धनुर्वेदसहिंता –3/61
**88.** धनुर्वेदसहिंता –3/62

**89.** धनुर्वेदसहिंता –3/63

**90.** धनुर्वेदसहिंता –3/63 पश्चात

**91.** धनुर्वेदसहिंता –3/63 पश्चात् स्थाच्चसाधनन्तु समदिस्थले विधेयम्। धनु–31

**92.** धनुर्वेदसहिंता –63/पश्चता

**93.** धनुर्वेदसहिंता –3/65

**94.** धनुर्वेदसहिंता –2/65

**95.** धनुर्वेदसहिंता –65–66

# 3. धनुर्वेदस्य विषयवैशिष्ट्यम्

धनुर्वेदः शब्दे पदद्वयमस्ति। धनुः वेदः च। तत्र धनुः धिञ् +उस् = धनुस् किं वा धनुः इति वेदः इत्युक्ते विदति ज्ञायते।

विद्यते ज्ञायते अनेन इति वेदः । प्रचीनकाले धनुः श्रेष्ठायुधमस्ति। अतः समपूर्णयुद्धशास्त्रं युद्धस्य ज्ञानतन्त्राणि धनुर्वेदः नाम्नः ज्ञायते। धनुवेदः इत्युक्ते –सम्पूर्ण युद्धान्तगर्तसम्पूर्णज्ञानम्। शब्दकल्पद्रमेर्यथा, धनूंषि उपलक्षणेन धनुरादीन् अस्त्राणि विद्यन्ते ज्ञायन्ते अनेन इति।[1]

वाचस्यत्यम् [2] कथ्यते हि –

यजुर्वेदस्योपवेदः यो धनुर्वेदः। लुप्तप्रायोऽभवत्। तस्यार्वाचीनपरम्परायां अग्निपुराणे वर्णनं प्राप्नोति। तस्य (धनुर्वेदस्य धनुर्विद्या वैकल्पिकनाममस्ति। वशिष्ठसंहितायाः प्रारम्भः मात्रगद्यातमकः इति। समपूर्णग्रन्थो महर्षिवशिष्ठ– राजर्षि किं वा मित्रयोः संवादरूपेण प्रदर्शितः।

संहितायां ऋषिद्वयस्य संवादे भगवानशिवश्च परशुरामयोः गर्भसंवादो अस्मिन् ग्रन्थे प्राप्यते।

ग्रन्थस्य परम्परानुसारेण भगवता शिवेन धनुर्वेदः जामदग्न्यपरशुरामाय दत्तः। परशुरामेण एषोधनुर्वेदो महर्षे वशिष्ठाय दत्तः।

स धनुर्वेदः राजर्षिविश्वामित्रो राजगुरुवशिष्ठमभ्युपेत्य प्रणम्योवाच, भगवन् धनुर्विद्यां ब्रूहि। अर्थात् स्व अर्याय विश्वामित्रो वसिष्ठं धनुर्वेदं ययाच्।

प्रस्तुत ग्रन्थे धनुर्वेदस्य प्रावीण्यस्य हेतवः स्पष्टीकरणं कृतानि यथा –

1. दुष्टशत्रुविनाशनम्।
2. तवहितम् (स्वऋसंरक्षणम्
3. दुष्टदस्य चौरादिभ्यः गोब्राह्मणसाधुवेदसंरक्षणम्।
4. प्रजापालनम्।[3]

अतः महर्षिणा वशिष्ठेन उद्घोषः कृतः –

एकोऽपि यत्र नगरे प्रसिद्धः स्याद्यद्धनुर्धरः।
ततो यान्त्यरयो दूरान्मृगा सिंहगृहादिव।।[4]

एवं युद्धश्चस्त्रशस्त्रज्ञानश्च पररक्षणाय स्वरक्षणाय चानि वार्यमिति।

**गुरुशिष्ययोः अधिकारत्वम्, गुरोः अधिकारः –**

अस्योपवेदस्य प्रणेता भगवान–शिवः शिष्यपरम्परायां तु भार्गव परशुरामः क्रमशः महर्षिवशिष्ठः अर्थात् –

सदाशिवः – देवाधिदेवः
भार्गवपरशुरामः – विष्णोः अवतारः
ऋषिवशिष्ठः – ब्रह्मपुत्र च ब्रह्मज्ञानिमहर्षिः
राजर्षिविश्वामित्रः – स्वार्चित ब्राह्मष्चर्यम्।

एतानि सर्वाणि सूचयति यत् एतस्याः विद्ययाः रहस्यं पूर्णज्ञानाय उच्चाध्यात्मिकतावश्यकमिति। तदुपरान्ते गुरोः कति शास्त्राणि प्रयोज्यते तेनाधारेण गुरोः स्तर नामश्च निर्धायते। यथा –

**1.आचार्यः –** आचार्यं सप्तयुद्धं कथ्यते। सप्तानां प्रकाराणां शास्त्राणां ज्ञाता–सप्तेभ्यः आयुधेभ्यः युद्धं कर्तु समर्थश्च इति आचार्यः।

सप्तानि आयुधानि यथा चक्रकुन्तखड्गछुरिकागदाकौण्डदण्डानि च।

**1.भागर्वः –** केषामपि चत्वाराणामायुधानां ज्ञाता। तै चतवारैः आयुधैः युद्धं कर्तुं समर्थः।

**2.योद्धः** – काभ्यामपि द्वाभ्यामायुधाभ्यां युद्धं कर्तुं समर्थः।

**3.गणकः** – एकेनायुद्धेन कुशलतापूर्वकं युद्धं कर्तुं समर्थः।[5]

**4.शिष्यः –**धनुर्वेदसंहितायां वर्णितपरम्परायां प्रास्ताविके गद्यखण्डे कथ्यते हि शिष्यो –

**धीमान्** – मेधावी, बुद्धिमान।

**दृढ़चेता** – दृढ़मनोबलयुक्तः, दृढ़चेतनावान्।

**श्रोत्रियः** – शिष्ये लोभ–धूर्तता अपकारिता–मन्दबुद्धयादि येः अवगुणाः न भवेयुः इति। महर्षिणा वशिष्ठेन स्पष्टं कृतं यत् धनुर्विद्या कुबुद्धि–अशान्त–गुरुद्रोही –अभक्त–क्रद्धेभ्यः शिष्येभ्यः न दातव्यम्। एषां दुर्गुणानां अभावः इत्युक्ते कायिक–मानसिक–वाचिक–वाचकिसमर्थं श्रेष्ठत्वञ्चेति अन्यञ्च योद्धा वीरः योगयुक्तः भवेञ्च मृत्युशय्यां निर्माल्यासूचक –वाक्यानि न जल्पयेतत् सः स्वर्गं प्राप्यतेति।[6]

**शस्त्रसञ्चालकस्य नियमाः –**

अर्थात् केन सह योद्धव्यम् ? केन सह न योद्धव्यम् ? तस्मै निर्माणाय नियमाः धनुर्वेदे 'हन्त्व्याहन्तव्योपदेशः' नाम्नः विभागे कथितं यत् –

1. सुप्तम् शयनाधिन पुरुषम्।
2. प्रसुत्पम् भूमौ पतित पुरुषम्।

3. उन्मतम् कामार्तपुरुषम्, अस्थिरचित्पुरुषम्

4. ह्यकच्छम् शिथिलावस्त्रयुक्तं–अधोवस्त्ररहितपुरुषञ्च।

5. शस्त्रवर्जितम् पतितेन शस्त्रेण रिक्तहस्तोपुरुषः।

6. बालम् अबुधः, बालकः

7. स्त्रियम् नारी, नारीवेषधारिपुरुषः।

8. दीनावाक्यम् दीनावाक्योद्गारपुरुषः।

9. धावन्तम् रणंत्यक्त्वा पलायमानपुरुषम्।

एतादृशाः सैनिकाः वा नरः अवध्याः।[7] इतोऽपि शस्त्रास्त्राणां सञ्चालने कुशलो योद्धा वचसा–मनसा–कर्मणा–कायेन शुद्धः सात्विकः न्यायीश्च आवश्यको भवेत् न चेत शस्त्रास्त्राणि स्वयमेवाकुशलयोद्धां विनश्येति।[8]

**सामाजिक–दृष्टिकोणात् –**

अस्मिन् विषये सैन्यरचना सैन्यभरतीश्च भरतीकाले सैनिकानां योग्यतां च सामाजिक(वर्णिक) दृष्ट्यामपि विचारणीयमस्ति। प्राचीनसमाजस्य कर्मानुसारेण चत्वारेषु वर्गेषु वर्गीकृतम् यथा –

1. अध्ययन–अध्यापनकर्ता – **ब्राह्मणः**
2. पालन–रक्षणश्चकर्ता – **क्षत्रियः।**
3. वाणिज्यक व्यवसायिकञ्च क्षेत्रेषु भूताः – ***वैश्यः।***
4. यैः विना अन्यानि कार्याणि कर्तारः – **शूद्रः।**

प्राच्यराज्ये युद्धस्य सम्भावानायाः कारणमस्ति। आक्रमण–संरक्षणं द्वयमिति। अतः समाजस्य रक्षण–पालनञ्चकर्ताद्वयक्षत्रियः समाजे आसीत्। अतः व्यवाहारिकस्तरे क्षत्रियः सतत् धनुर्विद्यायाः अभ्यासरत भूत्वा धनुर्वेदे पार›तो भवेत् एवं। आपात्काले समाजः स्वसंरक्षणाय च राष्ट्रीयरक्षणाय च एतस्याः विद्यायाः ज्ञानमुनिवार्यासीत्।

अतः प्राच्याकाले शस्त्रज्ञानं प्रत्यकवर्णस्य क्षमातानुसारेण आवश्यकतानुसारेण ददात्। एवं मन्यते कथ्यते हि धनुर्वेदे–

ब्राह्मणाय धनुर्वेदं खड्गं वै क्षत्रियाय च।
वैश्याय दापयेत् कुन्तं गदां शूद्रा च दापयेत्।।

अर्थात् – ब्राह्मणाय धनुः
– क्षत्रियाय खडगम्

– वैश्याय कुन्तः

– शूद्राय गदा एवं समाजस्य प्रत्येकेन सक्षमेन धनुर्विद्यायां ज्ञानं प्राप्तुमावश्यकमस्ति। अत्र यजुर्वेदस्य प्रार्थना यथा –

कुशल धनुर्धराः

महान योद्धा

विजयी सारथयः

नगररक्षायां समर्थाः स्त्रियः समाजे भवेयुः इति वेदस्य प्रार्थनामपि एवमस्ति।[9]

**सैन्यरचना** – सैन्यम समर्था–वीर–निर्भाकञ्च शत्रुणां भर्यातकत भवेत्।

**विभागः** – भारतीयप्राच्यसैन्यस्य परम्परागतानुसारेण चत्वारि अ›ानि भवितानि। यथा–पद्धति–अश्वदल–हस्तिदल–रथेतानि चतुरंगानि तेन कारणेन चतुरङ्गिणीति सेना शब्देन अभिधीयते।

**राजा –** सैन्यस्य मुख्यनेता राजा एव भवति। अनिवार्येन राता सम्पूर्ण–धनुर्विद्यायाः ज्ञानं प्राप्तं करणीयम् रणनीर्तिज्ञो भूत्वा व्याकरणोपरि प्रभुत्वं प्राप्तं करणीयम्। अतः क्रियापदस्य धातुनः आज्ञार्थरूपाणि च विशेषेण द्वितीयपुरुषस्य रूपाणि कण्ठस्थं कुर्यात्। येन कारणेन सैनिकान् प्रयाण–आक्रमणादि आदेशाः सम्यक् रूपेण दापयेत्।[10]

**सेनापतिः** – सेनायाः अधिपतिः शक्तिशाली–बलवान्–श्रमसाध्य–ज्ञानी–क्षत्रियवर्णस्यचादिनां गुणानां युक्तः भेवदिति।नियमाचरणेषु सेनानायकस्य स्वभावः प्रकृतिः सैन्यस्यसर्वाधिकारिनः सैनिकान् प्रति समानमेव भवेत्।तथा च सर्वाङ्गधनुर्वेद–व्याकरण–क्षात्रकोश–मनुस्मृति–मिताक्षरा–जयार्णव–विष्णुयमल विज्यख्या स्वशास्त्रादीनि सर्वाणि शास्त्राणि ज्ञातव्यानि च।[11]

**पदाति** – एतत्चतुरंगसैन्यस्य महत्वपूर्णम›मस्ति। 'पदम्' इत्युक्ते केनापि वाहनेन प्रणिना च विना स्वस्य पदाभ्यां युद्धंकर्तारसैनिकाः इति। पदातिसैन्ये सैनिकाः समोच्या ह्रस्व च कूर्दवे–धावने ये–वै समास्ते कायसाधकाः भवेयुः इति च पश्चादगमनं स्थिरीकरणं शयनं धावनं परसेनायां पार्श्वदिक्षु चलनं कारयेदिति इति लक्षणमाना पदाति सैनिकः भवदीति।[12]

**अश्वदलम् :–** (अश्वान् भिन्न–भिन्नगत्याम् चालेषु च प्रशिक्षयेत्। यथा वर्तुलाकारं –चतुरस्त्र–गोमूत्र–अर्धचन्द्रकार नागपाशादिप्रणालिकासु क्रमेण अश्वान् भ्रामेयत्।[13]

**हस्तिदलम्** :– गणानां पर्वतारोहणम्–जलगमनम् धावनम् उत्थानम् –उपवेशनम्–अलातचक्रादिभिः भित्तिमिवारणामादि कार्याणि यैः कार्यैः गजान् प्रशिक्षयेत् ।[14]

**रथः –** रथे योजयित्वा अश्वाः युद्धस्य प्रशिक्षणाय समतलभूमौ धावनयेत् ।[15]

वशिष्ठसंहितायां उष्ट्र–ऋषभ सैनिकानामसमादीनां उल्लेखः नास्ति।

**विभागः –** तथैव सेनाविभागाः संख्या–रचनायाः उल्लेखः अत्र न प्राप्यते वेदे मरुतानां सन्दर्भे सप्त [16] त्रिसप्त (3×7) [17] सप्तसप्तश्च (7×7)[18] उल्लेख: दृश्यते। महाभारते तस्य प्रकारस्य 'अक्षौहिणी' शब्दः प्रचलितोऽस्ति।

**शस्त्राणि** – युद्धनीतिः शस्त्रोपरि महत्याधारं धारयति। धनुर्वेदे प्रयोगः लक्षण–हेतवाधारेण शास्त्राणां चतवारि विभागः प्रदर्शिता ।[19]

**1.मुक्तम्** – लक्ष्यवेधनाय यत् अस्त्रम् सम्पूर्णतया हस्तेन वा यन्त्रेण त्यज्यनीय शास्त्रमिति मुक्तास्त्रम् कथ्यते। यथा–बाणम्।

**2.मुक्तामुक्तयुधम्** –परिस्थित्यानुसारेण एतानि अस्त्राणि हस्ते धारयित्वा वा हस्तेन त्यक्त्वा प्रकारद्वयेन युद्धं कर्तुं शक्त्येति। यथा कुन्तम्–छुरिका इत्यादयः।

3.**अमुक्तमलक्ष्यभेदनाय :–**हस्ते धारयित्वा प्रहारे करणीयम् यथा –खडगम्।

**यन्त्रमुक्तमायुधम्–**तानि आयुधानि यन्त्राधारेण प्रयोग प्रयुज्यानि यथा–शताघ्नी

अग्निपुराणे अस्त्रशास्त्रान् पञ्चविभागेन विभाजितम्। यथा –

1. यन्त्रमुक्तम् उपरोक्तानुसारेण।
2. पणिमुक्तम् हस्तेन त्यक्त्वा युद्धानि
3. मुक्तसन्धानरितम् एकबारं त्यक्त्वा पुनः प्राप्तायुधानि।
4. अमुक्तम् उपरोक्तानुसारेण।
5. बाहुयुद्धम् मल्लयुद्धम् ।[20]

कथ्यते यत् हि धनुर्वेदे नालिका नाम लघवोबाणानि वायोर्दिशानुसारेण चालयेतदा लक्ष्यं भेदयित्वा तानि बाणानि धनुर्धरेण समीप पुनरागञ्छन्ति एतानि बाणानि उन्न्तलक्ष्य भेदनाय च दुर्गे स्थियित्वा युद्धाय च अत्युपयोगितानि सन्ति।

नालिका लघवो बाणा नलयन्त्रेण नोदिता।
अत्युच्चदूरपातेषु दुर्गयुद्धेषु ते मताः।।[21]

नलयन्त्रेण प्रयुज्य नालिका–शतघ्नीञ्चायुधे शत्रून् घेरयित्वा दुर्गोपरि दुर्गात् वा दुर्गे स्थित्वा शत्रोपरि आक्रमणाय उपयुज्ये इति।[22]

तथा च धनुर्वेदे सैनिकानां गणवेशः अर्थात् शत्रुप्रहारात् रक्षणीययधारणीयोपकरणानि तेषाम्मुलेखो नास्ति। तस्योल्लेखः वेदे सन्ति। यथा तानि संरक्षणात्मकानि उपकरणानि मरुताः धारयमिन्तीति।

क्षिप्र – शिरस्त्राणम्।[23]
ऋष्टि – स्कन्धे धारणया कुन्तः भल्लम्।[24]
रुक्म् – वक्ष्यस्थले धारितविशालकवचम्।
वाशी – परशुः।
धन्वः – चापम्।
इषुः – बाणम्।
कृति – कर्तनयन्त्रम्।[25]

सर्वाणि आयुधानि प्रकारद्वयेन विभाजितम्। अस्त्रशस्त्राश्च। 'शस्त्रम्' इत्युक्ते उपरोक्त दर्शितानि। अस्त्रम् इत्युक्ते देवानां दिव्यमन्त्रान् प्रयुज्य क्षेपनास्त्रम् अर्थात् (मिसाइल) तानि अस्त्राणि विविधानि प्रकाराणि सन्ति। तानि आयुधानि तेषामधिष्ठाता देवश्चास्त्रप्रक्षेपणस्य प्रयोजनानुसारेण यथा –

| क्रम | अस्त्रम् | देवता | प्रयोजनम् |
|---|---|---|---|
| 1 | ब्रह्मास्त्रम् | पितामहब्रह्मा | शत्रुवधाय/ शत्रुग्रहणाय |
| 2 | ब्रह्मदण्डः | पितामहब्रह्मा | अधिकरसंख्याशत्रुसंहाराय |
| 3 | पाशुपतास्त्रम् | भगवानशिवः | अधिसंख्यांशत्रुसंहाराय |
| 4 | वायवास्त्रम् | वायुदेवः | झंझावाात निर्माणाय |
| 5 | आग्नेयशास्त्रम् | अग्निदेवः | अग्नि प्रकटाय।[26] |

अस्त्रप्रयोगस्य सन्दर्भे ज्ञातव्यं यत् अस्त्राणां प्रभावो अन्तव्यापकरणश्च अतीवविनाशको भवति अतः तेषां प्रयोगः सामान्यकर्मेषु न करणीयम्। अन्यञ्च युद्धानां प्रयोगोपसंहारश्च द्वयस्य ज्ञानमावश्यकमिति।[27]

प्रयोगं चोपसंहारं यो वेति स धनुर्धरः।
सामान्ये कर्मणि प्राज्ञो नैवास्त्राणि प्रयोजयेत।।[28]

अन्यञ्च कथ्यते हि अस्त्रप्राप्तयोद्धा। मनसा–वाचा–कर्मणा शूचिर्भवेद नो चेत् कुर्यात्रञ्चासमर्थान् अस्त्राणि पिण्डयन्ति। आचार्येनपि आधिकारिकपरुषमेव अस्त्रज्ञानं दात्व्यम्।

मनोवाकर्मभिर्भात्यं लब्धास्त्रेण शुचिष्मता।
अपात्रमसमर्थञ्च दहन्त्यस्त्राणि पूरुषम्।।[29]

**शिक्षणम्/प्रशिक्षणम्/कौशल्यप्राप्ति :–**

वैदिकाकालात् आरभ्य धनुर्बाणौ शस्त्रास्त्रेषु उच्चतमस्थानेऽतीति। अतः गदाखड्गादीनां शस्त्राणां प्रयोस्य प्रशिक्षणमावश्यकमस्ति। तथापि धनुर्वेदे धनुर्बाणयोः शिक्षणं केन्द्रस्थानेऽस्ति। तथापि धनुर्वेदे धनुर्बाणयोः विस्तृतं विवरणं प्राप्यते। ग्रन्थस्य त्रयचतुर्थांशभागः धनुर्बाणसन्दर्भस्य विवरणं करोति। प्रथमं तु दीक्षावर्णनम् तत्र दीक्षायाः कर्मणिः तत्काले किं कर्तव्यम् –दीक्षायाः शुभमुर्हूतानि –आदभ्यिः विषयेभ्यंः आरभ्ययति।

चापस्य नापम्–लक्षणानि–निषिद्धानि चापानि धनोः प्रकाराः प्रत्यञ्चा – बाणम्–बाणस्य गुणाः बाणस्याग्रभागः –बाणस्य प्रकाराः बाणानुसन्धाने आवश्यकतास्थानानि धनुर्ग्रहणस्य प्रकाराः प्रत्यञ्चा ग्रहणः अर्पणयोः विविधाः यद्धतयः– बाणधारणाय नानाविधप्रकाराः एतानि च एतादृशानि अन्यानि बहूनि विषयानि विस्तृतरूपेण 'संग्रहः' सिद्धप्रयोगः च नाम्नः विभागेन दत्तानि।

तानि सर्वाणि विषयानि अद्यापि धनुर्धराः सैन्यप्रशिक्षण प्राप्तुं कर्त्तारः च सरलतया ज्ञातुं शक्नुवन्ति। धनुर्बाणानि तेषां नाम तः अद्यापि अनेनात्रवर्णिता वर्णनानुसारेण संग्रहस्थानेषु प्रदर्शिततानि धनुर्बाणानि च तेषां नाम्नः अद्यापि अभिज्ञातुं शक्यते इति। अन्यञ्च धनुर्वेदस्य सर्वाः प्रक्रियाः सचित्राः दर्शितुं शक्यते। तादृशैः रीत्यैः ताः प्रक्रिया वर्णिता सन्ति।

बाणस्याग्रभागस्य फलस्य विभिन्नप्रयोजनार्थाय विविधाः प्रकारः सन्ति, यथा –

1. शत्रुवधार्थाय।
2. अभ्यासाय।
3. कवचभेदनाय।
4. शत्रुधनोः प्रत्यञ्चाकर्तनाय।

क्वचिदाग्रभागः फलं विषयोऽपि क्रीयतेति। एतत्सर्वं सूचयति यत् स्वसंरक्षणाय रणभूम्यां व्यूहात्मकरीत्यां विभिन्नपरिस्थितिरस्तु धनुर्विद्यायाः प्रयोगं कथं सचोटसम्यकभ्यश्च भवेदति च ध्येयसिद्धिः कथं प्राप्नोति च तदर्थाय प्राचीनकाले अतिसूक्ष्मतात् चिन्तयन्ति च।[30]

**धनुर्वेदस्य विषयवैशिष्टयम् :–**

भेदनाय लक्ष्याणि विविधानि च येन कारणेन धनुर्धरः व्यवहारिकोपक्रमे युद्धे उपस्थितीनां परिस्थितीनां प्रतीकारस्य सज्जाता प्राप्नोति स्म। तेन ध्यात्वा लक्षणानि चतुर्प्रकारकाणि वर्णितानि सन्ति। यथा –

1. स्थिरम् :– स्थिरे लक्ष्ये लक्ष्यधनुर्धरद्वयोः स्थिरं भवेत् तदा।
2. चलम् :– चले लक्ष्यं चल भवति च धनुर्धरः अचलं भवति तदा।
3. चलाचलम् :– चलाचले लक्ष्यं स्थिरं स्थापयित्वा धनुर्धरः चलायमानं भवति।
4. द्वयचलम् :– द्वयाचले लक्ष्यं च धनुर्धरः च द्वयोः चलायमानौ स्त।[31]

पश्चात् समग्राः प्रयोगविधयः उपरोक्तघटकान् ध्यात्वा प्रदर्शिताः।

युद्धविद्यायाः प्रशिक्षणे योगविद्या विशेषेण प्राणायाम् अतिमहत्वपूर्णमस्ति। अतः 'श्रमक्रियायां [32] पूरक–रेचक–कूम्भकादीनां प्राणानां कथं आयामः करणीयम् इति महर्षिणा कथ्यते । यथा –

याचितव्या गुरोराज्ञा  बाणस्याकर्षणं प्रति।
प्राणवायुं प्रयत्नेन प्राणेन सह पूरयेत।।
कुम्भकेन स्थिरं कृत्वा हुंकारेण विसर्जयेत्।
इत्यभ्यासक्रिया कार्या धन्विना सिद्धिमिच्छिता।।

अर्थात् शरसन्धानात् पूर्वे गुरोराज्ञा योचितव्यम्। पश्चाद् पूरकविधिना प्राणवायुं आकृष्य रेचकविधितः प्राणवायुना त्यक्तकाले बाणं हुंŠारेण क्षिप्तेत। सिद्धिः इच्छन्तधनुर्धरेण एवमभ्यासक्रिया करणीया। अस्यां चचार्यां गुरुशिष्ययोः द्वयोः दृष्टिकोणौ प्रशिक्षणस्य महर्षिणावशिष्ठेन नोन्द्यनीयौ। यथा –

आचार्यस्य दृष्टिकोणः शिष्याय उत्तमप्रकारस्य प्रशिक्षणं दात्व्यमस्तीति।

भार्गवस्य दृष्टिकोणः दूरे बाणपातनाय च बाणस्य दूरपातने श्रेष्ठत्वं प्राप्तव्यमिति तस्य दृष्टिकोणः। राज्ञः दृढ़पदार्थं बलेन भेदनाय इव अस्ति।[33]

यस्य धनुर्धरस्य अस्याः ज्ञानपत्तयाः यः दृष्टिकोणः भेवत् स दृष्टिकोणः चत्वाराणां सिद्धान्तानां पालनेन विना ध्येयसिद्धिः न शक्यते।

1. श्रमः – अभ्यासायवश्यको श्रमः।

2. अस्खलितदृष्टिः – स्थिरा दृष्टिः, या एकाग्रता सूचयति।

3. प्राणायाम् – पूरकादि प्राणानां नियमनम्।

4. गुरुसमक्षं श्रमक्रिया – कुशलेन गुरुणा प्राप्तं प्रशिक्षणम्।[34]

अत्र संहितायां शीघ्रसन्धान–शब्दबेधित्वं नाना प्रकाराणि लक्ष्यभेदनानि बाणस्य गत्योपरि नियमादीनां विषयानामपि उल्लेखः संक्षेपेण प्राप्यते।

ब्रह्मर्षिणा वशिष्ठेन कथ्यते हि उत्तमकोट्याः धनुविद्यायाः कौशल्यं सिद्धहस्तं तदा भवति यदा धनुर्धरो बाणं पुण्यवत् कोमलतायैः धारयित्वा धनुः प्रत्यच्चा च एतादृशः पीडयेत यथा सर्प पीड़येत अर्थात् सर्पवत् धनुः प्रत्यञ्चे धारयेत्।

महर्षिणा वशिष्ठेन व्यावहारिके जीवनेऽपि एतादृशं दृष्टान्तं दर्शितम् यथा धनुर्धरस्य ध्येयम् चापक्य चिन्तायायै धनोः संरक्षणाय सावधानोऽस्ति तथैव शरसन्धानत्रयस्य ध्येयं लक्ष्यभेदनमिव भवति इत्यावश्यकमस्ति।[35]

एषां सर्वेषां विषयानां चर्चा–विवरणं पश्चाद् कतिपय रसप्रदानि विषयानि चर्चा प्राप्यन्ते। यथा आक्रमणाय स्वसंरक्षणाय चौषधयः वशीकरणादि –प्रयोगाः युद्धारम्भे योगमुद्राकर्तुमर्थाय रुद्र–हैमवत्योः मन्त्राणानामुच्चारणम् –चन्द्र–सूर्ययोः सम्यक् गतिकोणश्च प्राणायाम्–स्वशास्त्रास्य सिद्धान्तानांचरणमादीनि विषयानि चर्चितानि।

युद्धारम्भे युद्धस्य व्यूहरचनायाः ज्ञानमपि आवश्यकतामस्ति। वशिष्ठऋष्यानुसारेण युद्धसमये रणभूम्यां नृपस्योपस्थितिः आवश्यकतामस्ति। किन्तु नृपेण स्वस्य दक्षिणे–वामे–पार्श्वे योद्धाः सामन्ताः मित्रराजानः शूरवीराः सत्यवक्ताः विश्वासयोग्याः राजपुत्राः आप्ताः सेवकजातयः तान् सर्वात्मनः स्वरक्षायै स्थापयेत्। ये योद्धा परस्परगाढानुरक्ताः च सर्वाः शार्ऽधनुः धर्तारः च अश्वेन आरुह्य व्यूहरचनादिकौशल्येन निपुणाः च भवेयुः इति।[36]

युद्धकाले सैन्यस्य चतुरङ्गणीसेना योग्यस्थाने उपस्थितिः कर्तुमावश्यकम्। सर्वेषां समर्थबलवतञ्च योद्धा सैन्यस्य नायकरूपेण अग्रे स्थापयित्वा स्वपदानुसारेण आवश्यककार्याणि –रणभूमिः–शत्रूणां बलादिनां विषयानां विचारं कृत्वा दण्ड– वराह–शकट–मत्स्य–मकर–पद्मादीनां व्यूहानां रचना करणीया।[37]

तदुपरान्ते सेनानायकेन धातव्यं यत् सैन्यस्यामुकभागैव युध्यति् च कतिपयभागः चतुर्षुदिक्षुं शतकेन सर्वेक्षणं कारयेत् इति [38] युद्धकाले नानाप्रकार –स्योपस्थित परिस्थित्यानुसारेण रणनीति व्यूहरचनादि परिवर्तयेत् तदा तत्काले सैन्य नायकेन ध्यातव्यम् यत्

1. रथदलप्रयोगं समतलभूमौ करणीयम्।
2. जले–गजे–तुम्बी–मसक–नौाकदिवाहनैः द्वारा युद्धं करणीयम्।
3. पदतिसैन्यं हस्तेन भुशण्डी वा कोदण्डम् गृहीत्वा वने वा वृक्षेष्वन्तर्धानः सैनिकाः वा वृक्षारूढ़ा भूत्वा युद्धं करणीयम्।
4. स्थलप्रदेशे ढाल–तलवार–भाला–परशुः इत्यादि आयुधैः युद्धं करणीम्। स्वरक्षणाय क्रमणाय च योधव्यमिति। प्रत्येकविभागान् पथप्रदर्शनाय च संयोगानुसारेण मार्गदर्शननाय योग्ययोद्धस्य नियुक्तिं करणीयम्।[39]

पारितोषक चन्द्रकान् दत्वा सैन्योत्साहः वर्धनाय विवरणं कौटिल्यार्थशास्त्रसमराजनीतिविषयकग्रन्थेषु कृतम्। किन्तु धनुर्वेदे तस्य प्रत्यक्षोल्लेखः नास्ति। तथापि सैन्यस्य विजय प्राप्त्यर्थे प्रोत्साहितकरणाय महर्षिणा कथितं यत् शत्रोपरि विजयपश्चात् नृपेण योद्धां मुक्तहस्ते द्रव्याणि पारितोषकरूपेण दातव्यमिति अन्ततोगत्वा महर्षिणा कथ्यते हि प्रत्येको योधः धैर्येण युद्धं कृत्वा शत्रूणां विनाशं करणीयम्।[40]

एवं महर्षिवशिष्ठकृत धनुर्वेदसंहितायां वर्णितविषयानि मनसि युद्धस्य विचारात् आरभ्य विजयपर्यन्तं वर्णनानि गुणलक्षणानि शरललक्षणानि –फललक्षणानि–शरापरिपायनम्–लक्ष्यम्–लक्ष्याभ्यासः सज्जी–करणम् दुःसाध्यलक्ष्यभेदनम् अस्त्रादिसिद्धिविधिः –व्यूहः आदिम अनेकानि विषयानि विस्तरेण विस्तृतेन वर्णितानीति। महर्षिवशिष्ठेन सरलरीत्यां विषयवर्णनं कृतम् अस्ति।

अस्य ग्रन्थस्य विषयः धनुर्वेदोऽस्ति। ग्रन्थेऽस्मिन् धनुर्विद्यायाः अस्त्राणां च युद्धस्य विषये च क्रमबद्धवर्णनं अस्ति। विषय प्रवर्तनं सरलरीत्याऽन्यप्राचीन ग्रन्थेवदस्ति नाऽयम् प्रश्नोत्तररूपो ग्रन्थः।

# सन्दर्भ–सूची


1. शब्दकल्पद्रुम –द्वितीय भाग–पृ.–771
2. वाचपत्यस्यम् –पंचमभागे –पृ.–3841
3. धनुर्वेद प्रास्तविकम् गद्यखण्डः
4. तत्रैव, गद्यखण्डस्यान्तर्गत श्लोकाः –6
5. धनुर्वेदे –आचार्य लक्षणम्, श्लोक – 1
6. तत्रैव, श्लोकाः, 46, व्यूहादिभियुद्धकथनम्।
7. तत्रैव, श्लोका –64
8. तत्रैव, श्लोकाः –77, अस्त्राविधिः।
9. वाजसेनीयसंहिता – 22/22
10. धनुर्वेद – श्लोक 52–53 सेनानयः
11. तत्रैव, सेनापतिः करणविधिः
12. तत्रैव, श्लोकाः –54–55, पदातिक्रम
13. तत्रैव, श्लोकाः –63
14. तत्रैव, हस्तिक्रमः
15. तत्रैव, श्लोकाः, पश्चात्
16. शतपथ ब्राह्मणम् 5–4–3–37, तै. ब्रा. 1/6/26
17. अथर्ववेद – 13/13
18. ऋग्वेद – 5/52/17
19. यजुर्वेद – गद्यखण्ड पश्चात श्लोक
20. अग्निपुराणे – 249/2
21. धनुर्वेदे – 1/74, श्लोक–76 प्रत्यागमन
22. तत्रैव
23. ऋग्वेद – 8/7/25
24. तत्रैव – 1/64/4 एवं 5/57/6
25. तत्रैव

26. धनुर्वेद 1/अथास्त्रविधिः 71 तः 99
27. धनुर्वेदः, श्लोकः –78, अस्त्रविधिः
28. तत्रैव, श्लोकाः – 77
29. धनुर्वेदः – श्लोकाः, 64–65, अथ फललक्षणम्
30. तत्रैव, श्लोकाः– 95–98, अथ लक्ष्यम्
31. तत्रैव, श्लोकाः, 21–22
32. तत्रैव, श्लोकाः –25, अथ श्रमसाध्याः
33. धनुर्वेद, श्लोकाः, 99–100, अथ लक्ष्यम्
34. तत्रैव, श्लोकाः, 24, अथ श्रमसाध्य
35. तत्रैव, श्लोकाः, 35–36, 42–43
36. तत्रैव, श्लोकाः, 43–44, 47–49
37. तत्रैव, श्लोकाः, 51, अग्रतो भये पिपीलिका व्यूहम्
38. तत्रैव, अश्व, हस्ति च रथक्रमः
39. तत्रैव, श्लोकाः, 46, ततः व्यूहादिभिर्युद्धकथनम्।
40. तत्रैव,